मन्थरको नाम। स च मे मत्स्यमांसखण्डानि दास्यति। तद्भक्षणात्तेन सह सुभाषितगोष्ठीसुखमनुभवन् सुखेन कालं नेष्यामि। नाहमत्र विहङ्गानां पाशबन्धनेन क्षयं द्रष्टुमिच्छामि। उक्तं च—

समास :—तदुपकाररञ्जित = तस्य उपकारा: (तत्पु०), तैः रञ्जित (तत्पु०)। अश्रुपूर्णनयन = अश्रुभिः पूर्णे (तत्पु०), अश्रुपूर्णे नयने यस्य सः (बहु०)। बुभुक्षापीडित = बुभुक्षया पीडित (तत्पु०) बुभुक्षितजनैः = बुभुक्षिता: च ते जना: तैः (कमधा०)। आयुःशेषतया = आयुः शेषम् यस्य स: (बहु०), तस्य भावः तया (तद्धित)। वाष्पमोक्षम् = वाष्पाणां मोक्षः तम् (तत्पु०)। दक्षिणापथे = दक्षिणा पन्थाः तस्मिन् (कमधा०)। वनगहनमध्ये = वनस्य गहनम् (तत्पु०), तस्य मध्ये (तत्पु०)। परमसुहृत् = परमः च असौ सुहृद् (कमधा०)। मत्स्यमांसखण्डानि = मत्स्यानां मांसम् (तत्पु०), तस्य खण्डानि (तत्पु०) सुभाषितगोष्ठीसुखम् = सुभाषितानाम् गोष्ठ्यः (तत्पु०)। तासां तासु वा सुखम् (तत्पु०) पाशबन्धनेन = पाशैः बन्धनम् तेन (तत्पु०)।

व्या० —रञ्जित — रञ्ज् + इट् (इ) + क्त (त)। समभ्येत्य = सम् + अभि + आ + इण् (इ) + तुक् (त) + क्त्वा (ल्यप = य)। विरक्ति = वि + रञ्ज् + क्तिन् (ति), धातु के अनुनासिक 'ञ्' का लोप। बद्ध = बन्ध + क्त (त), धातु के अनुनासिक 'न्' का लोप, प्रत्यय के 'त' को 'ध', धातु के 'घ्' को 'द्'। प्रस्थित = प्र + स्था + क्त (त), धातु के 'आ' को 'इ'। अनुभवन् = अनु + भू + शतृ (अत्)। नेष्यामि = णीञ् (नी) धातु, लृट उ० पु०, एक०। द्रष्टुम् = दृशिर् (दृश्) + तुमुन् (तुम्), धातु की 'ऋ' और 'श्' के बीच में 'अम्' (अ) का आगम, धातु के 'श्' को 'ष्'।

शब्दार्थ —तदुपकाररञ्जितः = उसके उपकारों से (उसके प्रति) अनुरक्त। पक्षमध्ये = पक्ष (ओर) में। अहनि = दिन में। समभ्येत्य = पास आकर। सगद्गदम् = गद्गद होने के साथ। विरक्ति = वैराग्य, अरुचि, मन का न लगना। साम्प्रतम् = इस समय। अन्यत्र = और जगह। यास्यामि = जाऊँगा। अनावृष्ट्या = अनावृष्टि (वर्षा के अभाव) से। दुर्भिक्षम् = अकाल। बलिमात्रम् = बलि (पूजाकम) का ग्रास मात्र। प्रयच्छति = देता है। प्रगुणीकृताः = कई गुने

किए हुए, बढ़ाए हुए। आयुःशेषतया=जीवन के अवशिष्ट होने के कारण। उद्धरितः=मुक्त, छूटा हुआ। वाष्पमोक्षम्=अश्रुमोचन को, रोने को। प्रस्थितः=चल दिए। दक्षिणापथे=दक्षिण प्रदेश में, दक्षिण की ओर जाने वाले मार्ग में। वनगहनमध्ये=वन के भीतरी सघन भाग के बीच में। कूर्मः=कछुवा। मत्स्यमांसखण्डानि=मछलियों के मांस के टुकड़ों को। सुभाषितगोष्ठी-सुखम्=सुभाषितों के लिए की गई बैठकों के सुख का। अनुभवन्=भोगता हुआ, अनुभव करता हुआ। पाशबन्धनेन=जालों में बँधने के द्वारा।

हि० अनु०:—इस प्रकार वह चूहा उस (कौए) के उपकारों से (उसके प्रति) अनुरक्त हो इस प्रकार उसका विश्वास करने लगा कि उसके पक्ष (ओर) में होकर उसी के साथ सदा बैठक करने लगा। इसके बाद किसी दिन कौआ रोता हुआ उसके पास आकर गद्‌गद हो उससे बोला—'भाई हिरण्यक, अब इस देश से मुझे विरक्ति हो गई है सो दूसरे स्थान पर जाऊँगा।' हिरण्यक बोला—'भाई, विरक्ति का क्या कारण है।' वह बोला—'भाई, सुनो। इस देश में बड़ी भारी अनावृष्टि (वर्षा के अभाव) के कारण दुर्भिक्ष (अकाल) पड़ गया है। दुर्भिक्ष के कारण भूख से पीड़ित हो कोई भी व्यक्ति बलि का ग्रास मात्र भी नहीं देता है। दूसरे, घर-घर में भूखे लोगों ने पक्षियों के बाँधने के लिए जाल कई गुने कर दिए हैं (बढ़ा दिए हैं)। मैं भी जाल में बँधने के बाद जीवन के अवशिष्ट होने के कारण छूट पाया हूँ। यही विरक्ति का कारण है। इससे मैं विदेश का चल दिया और इसलिए मैं रोता हूँ।' हिरण्यक बोला—'अच्छा तो आप कहाँ को चल दिए।' वह बोला—'दक्षिण-प्रदेश में वन के भीतरी सघन भाग में एक बड़ा तालाब है। वहाँ तुमसे भी अधिक मेरा घनिष्ठ मित्र मन्थरक नामक कछुवा रहता है। वह मुझे मछलियों के मांस के टुकड़े देगा। उनको खाकर, उसके साथ सुभाषित गोष्ठियों (अच्छी बातों के लिए की गई बैठकों) के सुख का अनुभव करता हुआ सुख से समय व्यतीत करूँगा। मैं यहाँ जालों में बँधने के द्वारा पक्षियों का नाश नहीं देखना चाहता हूँ। कहा भी है—

> अनावृष्टिहते देशे शस्ये च प्रलयं गते।
> धन्यास्तात न पश्यन्ति देशभङ्गं कुलक्षयम् ॥५७॥

अन्वय —तात देशे अनावृष्टिहते शस्य च प्रलयम् गने धन्याः देशभङ्गम् कुलक्षयम् (च) न पश्यन्ति ।

समास —अनावृष्टिहते=अनावृष्ट्या हत तस्मिन् (तत्पु०) । देशभङ्गम्=देशस्य भङ्ग तस्मिन् (तत्पु०) कुलक्षयम्=कुलस्य क्षय तस्मिन् (तत्पु०) ।

व्या० —प्रलयम्=प्र+ली+अच् (अ) । भङ्गम्=भञ्ज्+घञ् (अ) ।

शब्दार्थ —अनावृष्टिहते=वर्षा के अभाव से पीडित म । शस्ये=अनाज के, फसल के । प्रलयम्=नाश को । देशभङ्गम्=देश के भङ्ग (उजडने) को ।

हि० अनु० —हे तात, देश के वर्षा के अभाव को पीडित होने पर और अनाज के (फसल) के नष्ट होने पर धन्य जन ही देश के ऊजड होने को और कुल के नाश को नही देखते हैं ।

> कोऽतिभारः समर्थाना किं दूर व्यवसायिनाम् ।
> को विदेशः सविद्यानां कः परः प्रियवादिनाम् ।।५८।।

अन्वय —स्पष्ट है ।

शब्दार्थ —अतिभार =अधिक भार (बोझा) । व्यवसायिनाम्=उद्योगियो को । सविद्यानान्=विद्वानो को ।

हि० अनु० —समर्थ व्यक्तियो के लिए क्या (वस्तु) अधिक भार है, उद्योगियो को क्या (स्थान) दूर है, विद्वानो को कौन (देश) विदेश है प्रिय बोलने वालो को कौन पराया है ।

> विद्वत्त्व च नृपत्व च नैव तुल्य कदाचन ।
> स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ।।५९।।

अन्वय —(स्पष्ट है) ।

हि० अनु० —विद्वत्ता और राज्य (राजत्व) कभी समान नही हो सकते, (क्योकि) राजा अपने देश मे ही पूजा जाता है, (जबकि) विद्वान् सर्वत्र पूजा जाता है ।

हिरण्यक आह—'यद्येव तदहमपि त्वया सह गमिष्यामि । ममापि महद्‌दुःख वर्तते । वायस आह—'भो , तव किं दुःखम् । तत्कथय ।' हिरण्यक आह—

'भोः, बहु वक्तव्यमस्ति अत्र विषये। तत्रैव गत्वा सर्वं सविस्तरं कथयिष्यामि।' वायस आह—'अहं तावदाकाशगतिः। तत्कथं भवतो मया सह गमनम्।' स आह—'यदि मे प्राणान् रक्षसि तदा स्वपृष्ठमारोप्य मां तत्र प्रापयिष्यसि। नान्यथा मम गतिरस्ति।' तच्छ्रुत्वा सानन्दं वायस आह—'यद्येवं तदन्योऽहं यदनवतानि सह तत्र कालं नयामि। अहं सम्पातादिकानष्टावुड्डीनगतिविशेषान् वेद्मि। तत् समारोह मम पृष्ठम्, येन सुखेन त्वा तत्सरः प्रापयामि।' हिरण्यक आह—'उड्डीनानां नामानि श्रोतुमिच्छामि।' स आह—

समासः—सविस्तरम्=विस्तरेण सहितम् (तत्पु०)। आकाशगतिः= आकाशे गतिः यस्य सः (बहु०) उड्डीनगतिविशेषान्=उड्डीनस्य गतयः (तत्पु०)। तासां विशेषाः तान् (तत्पु०)।

व्या०:—वक्तव्यम्=ब्रू या वच् (वक्)+तव्य। आरोप्य=आ+णिजन्त 'रुह्' (रोप्)+क्त्वा (ल्यप्=य)। प्रापयिष्यसि='प्र' पूर्वक णिजन्त 'आप्' धातु, लट्, म० पु०, एक०।

शब्दार्थः—वक्तव्यम्=कहना, कथनीय। आरोप्य=बैठा कर। प्रापयिष्यसि=पहुँचा दोगे। संपातादिकान्=संपात (उड़ने की चालों में से एक) आदि को। उड्डीनगतिविशेषान्=उड़ने के चालों की विभिन्न भेदों को। अकाशगति.=आकाशगामी। उड्डीनानम्=उड़ने की चालों के।

हि० अनु०:—हिरण्यक बोला—'यदि ऐसा है, तो मैं भी तेरे साथ आऊँगा। मुझे भी बड़ा भारी दुःख है।' कौआ बोला—'अरे! तुझे क्या दुःख है सो कह।' हिरण्यक बोला—'अरे! इस विषय में बहुत कहना है। वहीं जाकर सब कुछ विस्तार के साथ कहूँगा।' कौआ बोला—'मैं तो आकाशगामी हूँ, सो आपका मेरे साथ जाना कैसे होगा।' वह बोला—'यदि मेरे प्राणों की रक्षा करो तो अपनी पीठ पर बैठाकर वहाँ पहुँचाओ, दूसरी तरह मेरी गति नहीं है।' यह सुनकर कौआ आनन्द के साथ बोला—'यदि ऐसा है तो मैं धन्य हूँ और आपके भी साथ वहाँ समय व्यतीत करूँगा। मैं संपात आदि उड़ने की चालों के भेदों को जानता हूँ। सो मेरी पीठ पर बैठो, जिससे

सुखपूर्वक तुम्हे उस तालाब पर पहुँचा दूँ ।' हिरण्यक बोला—उडने की चालो के नाम सुनना चाहता हूँ । वह बोला—

सपातं विप्रपात च महापातं निपातनम् ।
वक्र तिर्यक् तथा चोर्ध्वमष्टम लघुसज्ञकम् ॥६०॥

अन्वय.—(स्पष्ट व सीधा है)

शब्दार्थः—संपातम्=(समवत.)सीधी व समगति से उडना । विप्रपातम्=(संभवतः) कुछ मुड कर या उलट कर उडना । महापातम्=(समवतः) एक दम जोर से उडना । निपातनम्=(समवतः) नीचे को गिरते हुए उड़ना । वक्रम्=टेढे उडना । तिर्यक्=तिरछे उडना । ऊर्ध्वम्=ऊपर को उडना । लघुसंज्ञकम्=लघु (सफाई या फुर्ती से उडना) नाम वाला ।

हि० अनु०.—सपात, विप्रपात, महापात, निपात, वक्र, तिर्यक्, ऊर्ध्व और आठवाँ लघु नाम वाला है ।

विशेष—उक्त संपात आदि उडने की विधियो के प्राचीन पारिभाषिक शब्द हैं, अतः इनका वास्तविक विशिष्ट स्वरूप तो इनका वर्णन करने वाले शास्त्र मे ही जाना जा सकता है । ऊपर इनका शब्दार्थ देते हुए इनके व्युत्पत्ति-लभ्य सामान्य अर्थ के आधार पर संभाव्य अर्थ ही दिया गया है ।

तच्छ्रुत्वा हिरण्यकस्तत्क्षणादेव तदुपरि समारूढः । सोऽपि शनैः शनैस्तमादाय सपातोड्डीनप्रस्थितः क्रमेण सरसर प्राप्तः । ततो लघुपतनकं मूषकाधिष्ठितं विलोक्य दूरतोऽपि देशकालविदसामान्यकाकोऽयमिति ज्ञात्वा सत्वर मन्थरको जले प्रविष्ट. । लघुपतनकोऽपि तीरस्थतरुकोटरे हिरण्यक मुक्त्वा शाखाग्रमारुह्य तारस्वरेण प्रोवाच—'भो मन्थरक, आगच्छागच्छ । तव मित्रमह लघुपतनको नाम वायसश्चिरात्सोत्कण्ठ. समायातः । तदागत्यालिङ्गय माम् । उक्तं च—

समास—संपातोड्डीनप्रस्थितः=सपातं च तदुड्डीनम् (कर्मधा०), तेन प्रस्थित. (तत्पु०) । मूषकाधिष्ठितम्=मूषकेन अधिष्ठितः तम् (तत्पु०) । देशकालविद्=देशश्च कालश्च (द्वन्द्व), तौ वेत्ति (उपपदतत्पु०) असामान्यकाकः=असामान्यश्चासौ काकः (कर्मधा०) । तौ रस्थतरुकोटरे=तीरे तिष्ठति (उपपदतत्पु०), तीरस्थश्च असौ तरुः (कर्मधा०), तरोः कोटरे (तत्पु०) ।

व्या०.—समारूढ=सम्+आ+रुह्+क्त (त) आदाय=आ+दा+क्त्वा (ल्यप्=य)। अधिष्ठितम्=अधि+स्था+क्त(त)। विलोक्य=वि+लोक्+क्त्वा (ल्यप्=य) देशकालविद्=देशकाल+विद्+क्विप् (X) ज्ञात्वा=ज्ञा+क्त्वा (त्वा)। तीरस्थ=तीर+स्था+क (अ)। मुक्त्वा=मुच्+क्त्वा (त्वा)। समायात=सम्+आ+या+क्त (त)। आगत्य=आ+या+क्त (त)। आगत्य=आ+गम्+क्त्वा (ल्यप्=य)।

शब्दार्थः—तत्क्षणादेव=उसी समय, उसी क्षण। समारूढ=चढ़ गया, बैठ गया। आदाय=लेकर। संपातोड्डीनगतिरुपेत=संपात नामक उड़ने की गति से चलता हुआ। मूषकाधिष्ठितम्=चूहे से अधिष्ठित को। देशकालविद्=देश-काल को जानने वाला। असामान्यकाक=असाधारण कौआ। सत्वरम्=शीघ्र। तीरस्थतरुकोटरे=किनारे पर स्थित वृक्ष के कोटर (खोखले) में। तारस्वरेण=उच्च स्वर से। चिरात्=देर से, बहुत समय से।

हि० अनु०—यह सुनकर हिरण्यक उसी क्षण उसके ऊपर बैठ गया। वह (कौआ) भी धीरे-धीरे उसे लेकर संपात उड़्डयन-गति से चलता हुआ क्रम से उस तालाब पर पहुँचा। तब लघुपतनक को चूहे के द्वारा अधिष्ठित देखकर दूर से ही देशकाल को जानने वाला मन्थरक (नामक कछुवा) 'यह असाधारण कौआ है' यह जान कर शीघ्र ही जल में घुस गया। लघुपतनक भी किनारे पर स्थित वृक्ष के कोटर (खोखले) में हिरण्यक को रख कर शाखा के अग्रभाग पर बैठ उच्च स्वर से बोला—'हे मन्थरक, आओ आओ।' मेरा मित्र मैं लघुपतनक नामक कौआ बड़ी देर से उत्कण्ठा के साथ आया हूं। सो आकर मुझ से मिलो। कहा भी है—

> किं चन्दनैः सकर्पूरैस्तुहिनैः किं च शीतलैः ।
> सर्वे ते मित्रगात्रस्य कलां नार्हन्ति षोडशीम् ॥१५॥

अन्वय—सकर्पूरैः चन्दनैः किम् शीतलैः तुहिनैः किम्। ते सर्वे मित्रगात्रस्य षोडशीं कलाम् न अर्हन्ति।

शब्दार्थः—तुहिनैः=बर्फ से, बर्फ के टुकड़ों से, हिमकणों से।

हि० अनु० —कपूर मिले हुए चन्दनो से क्या ? शीतल हिमकणो से क्या ? ये सब (शीतल पदार्थ) मित्र के शरीर के सोलहवें अश से भी (शीतलता में तुलना करने के) योग्य नही है।

तथा च।

हि० अनु० —और भी।

केनामृतमिदं सृष्टं मित्रमित्यक्षरद्वयम्।
आपदां च परित्राणं शोकसंतापभेषजम् ॥२५॥

अन्वय —आपदाम् परित्राणम् शोकसंतापभेषजम् च मित्रम् इति अक्षरद्वयम् इदम् अमृतम् केन सृष्टम्।

समास —शोकसंतापभेषजम्=शोकेन संताप (तत्पु०), तस्य भेषजम् (तत्पु०)।

व्या० —परित्राणम्=परि+त्रा+ल्युट् (यु=अन) सृष्टम्=सृज्+क्त (त)।

शब्दार्थ —परित्राणम्=रक्षक, बचाने वाला बचाव का साधन।

हि०अनु० —आपत्तियो से रक्षा करने वाला एवं शोकजन्य संताप की औषध 'मित्र' इस प्रकार का अक्षरयुगल (दो अक्षरो का जोडा) रूपी यह अमृत किस ने बनाया है ?

तच्छ्रुत्वा निपुणतरं परिज्ञाय सत्वरं सलिलान्निष्क्रम्य पुलकिततनुरानन्दाश्रुपूरितनयनो मन्थरकः प्रोवाच—'एह्येहि मित्र, आलिङ्गय माम्। चिरकालान्मया त्वं न सम्यक् परिज्ञातः तेनाहं सलिलान्तः प्रविष्टः। उक्तं च।

समास —पुलकिततनु =पुलकिता तनुः यस्य सः (बहु०) आनन्दाश्रुपूरितनयन =आनन्देन अश्रूणि (तत्पु०), तैः पूरिते नयने यस्य सः (बहु०)।

व्या —परिज्ञाय=परि+ज्ञा+क्त्वा (ल्यप्=य)। निष्क्रम्य=निस्+क्रम्+क्त्वा (ल्यप्=य)। परिज्ञात =परि+ज्ञा+क्त (त)।

शब्दार्थ —निपुणतरम्=खूब अच्छी तरह। परिज्ञाय=जान कर, पहिचान कर। निष्क्रम्य=निकल कर। पुलकिततनु =रोमाञ्चयुक्त शरीर वाला। आनन्दाश्रुपूरितनयन =आनन्दजन्य आँसुओ से पूर्ण नेत्रो वाला। चिरकालात्=बहुत समय से, बहुत समय हो जाने के कारण।

हि० अनु०:—यह सुनकर खूब अच्छी तरह पहचान कर शीघ्र ही जल से निकल कर रोमान्चयुक्त शरीर एवं खुशी के आंसुओं से भरे हुए नेत्रों के साथ मन्थरक बोला—'मित्र, आओ आओ। मुझ से मिलो। (बिना मिले) बहुत समय हो जाने के कारण मैंने तुमको अच्छी तरह नहीं पहचान पाया। अतः मैं जल के भीतर घुस गया। कहा भी है—

> यस्य न ज्ञायते वीर्यं न कुलं न विचेष्टितम्।
> न तेन संगतिं कुर्यादित्युवाच बृहस्पतिः ॥५३॥

अन्वयः—यस्य वीर्यम् न ज्ञायते, कुलम् न (ज्ञायते), विचेष्टितम् न (ज्ञायते), तेन संगतिम् न कुर्यात्, इति बृहस्पतिः उवाच।

व्या०—संगतिम्=सम्+गम्+क्तिन् (ति)। विचेष्टितम्=वि+चेष्ट्+इट् (इ)+क्त (त)।

शब्दार्थ—वीर्यम्=पराक्रम। विचेष्टितम्=कार्य, चेष्टा, आचरण।

हि० अनु०:—जिसका पराक्रम, कुल एवं आचरण नहीं ज्ञात हो, उसके साथ मिलन न करे, ऐसा बृहस्पति ने कहा है।

एवमुक्ते लघुपतनकों वृक्षादवतीर्य तमालिङ्गितवान्। अथवा साध्विद-मुच्यते—

हि० अनु०.—ऐसा कहने पर लघुपतनक वृक्ष से उतर कर उन से मिला। क्यों न ऐसा हो, यह ठीक ही कहा जाता है—

> अमृतस्य प्रवाहैः किं कायक्षालनसंभवैः।
> चिरान्मित्रपरिष्वङ्गो योऽसौ मूल्यविवर्जितः ॥६४॥

अन्वयः—कायक्षालनसंभवैः अमृतस्य प्रवाहैः किम्, यः चिरात् मित्रपरिष्वङ्गः, असौ मूल्यविवर्जितः।

समासः—कायक्षालनसंभवैः=कायानां क्षालनम् (तत्पु०), तेन संभवः येषां तैः (बहु०) मित्रपरिष्वङ्ग=मित्रस्य परिष्वङ्गः। मूल्यविवर्जितः=मूल्येन विवर्जित.।

व्या०:—क्षालन=णिजन्त 'क्षल्' (क्षाल्)+ल्युट् (यु=अन)। संभवैः=

सम्+मृ+अप् (अ)। परिष्वङ्ग=परि+स्वञ्ज्+घञ् (अ)। विवर्जित — वि+णिजन्त 'वृज्' (वज्)+इट् (इ)+क्त (त)।

शब्दार्थ—कायक्षालनसम्भवै—शरीरों के धोने से उत्पन्न से। मित्रपरिष्वङ्ग =मित्र का आलिंगन। मूल्यविवर्जित =मूल्यरहित, अमूल्य।

हि० अनु०—(देवों के) शरीरों के धोने से उत्पन्न होने वाले अमृत के प्रवाहों से क्या प्रयोजन, (व्यर्थ है), बहुत दिनों के बाद जो मित्र का आलिंगन होता है, वह तो अमूल्य है (अमृत मित्रालिंगन की बराबरी नहीं कर सकता)।

विशेष—मित्रालिंगन की अपेक्षा अमृत के प्रवाहों को हेय प्रदर्शित करने के लिए यहाँ 'कायक्षालनसम्भवैः' कहा गया है। इसके अतिरिक्त, भगवच्चरण का प्रक्षालन करने से भी ब्रह्मा के कमण्डल का जल अमृत हो गया, इस ओर भी यहाँ संकेत हो सकता है।

एवं द्वावपि तौ विहितालिङ्गनौ परस्परं पुलकितशरीरौ वृक्षादधः समुपविष्टौ प्रोचतुरात्मचरित्रवृत्तान्तम्। हिरण्यकोऽपि मन्थरकस्य प्रणामं कृत्वा वायसाभ्याशे समुपविष्टः। अथ तं समालोक्य मन्थरको लघुपतनकमाह—भोः कोऽयं मूषकः। कस्मात्त्वया भक्ष्यभूतोऽपि पृष्ठमारोप्यानीतः। तदत्र स्वल्पकारणेन भाव्यम्।' तच्छ्रुत्वा लघुपतनक आह—'भो, हिरण्यको नाम मूषकोऽयम्। मम सुहृद्द्वितीयमिव जीवितम्। तत्किं बहुना।

समास—विहितालिङ्गनौ=विहितम् आलिङ्गनम् याभ्यां तौ (बहु०)। पुलकितशरीरौ=पुलकिते शरीरे ययोः तौ (बहु०)। आत्मचरित्रवृत्तान्तम्= आत्मनः चरित्रे (तत्पु०), तयोः वृत्तान्तम् (तत्पु०)। वायसाभ्याशे=वायसस्य अभ्याशे।

व्या०—विहित=वि+धा+क्त (त), धातु को 'हि' आदेश। समुपविष्टौ=सम्+उप+विश्+क्त (त)। आनीत =आ+नी+क्त (त)। भाव्यम्=भू+ण्यत् (य)। जीवितम्=जीव्+इट् (इ)+क्त (त)।

शब्दार्थ—विहितालिङ्गनौ=आलिंगन कर चुकने वाले। समुपविष्टौ=बैठे हुए। आत्मचरित्रवृत्तान्तम्=अपने चरित्रों (हाल-चालों) का वृत्तान्त। वायसाभ्याशे=कौए के पास। समुपविष्टः=बैठा, बैठ गया। समालोक्य=

देखकर। भक्ष्यभूतः=भोजन बना हुआ। भाव्यम्=होना चाहिए। जीवितम्=जीवन, प्राण।

हि० अनु०'—इस प्रकार उन दोनो ने परस्पर आलिगन कर पुलकित शरीर के साथ वृक्ष के नीचे बैठ कर अपने-अपने चरित्र (हाल-चाल) का वृत्तान्त कहा। हिरण्यक भी मन्थरक को प्रणाम कर कौए के पास बैठ गया। तब उस (चूहे) को देख कर मन्थरक लघुपतनक से बोला—'अरे! यह चूहा कौन है? तुम अपना भाजन होते हुए भी इसे पीठ पर रखकर क्यों लाए हो? सो इसमे कोई सामान्य कारण नही होना चाहिए।' यह सुनकर लघुपतनक बोला—'भाई यह हिरण्यक नाम का चूहा है, यह मेरा मित्र और दूसरे प्राण के समान है। अधिक कहने से क्या—

पर्जन्यस्य यथा धारा यथा च दिवि तारका।
सिकतारेणवो यद्वत् सख्यया परिवर्जिता ॥६५॥

गुणाः सख्यापरित्यक्तास्तद्वदस्य महात्मनः।
परं निर्वेदमापन्नः सम्प्राप्तोऽयं तवान्तिकम् ॥ ६६ ॥

अन्वयः—यथा पर्जन्यस्य धाराः, यथा च दिवि तारकाः, यद्वत् सिकतारेणवः सख्यया परिवर्जिताः। तद्वत् अस्य महात्मनः गुणाः सख्यापरित्यक्ताः (सन्ति), परम् निर्वेदम् आपन्नः अयम् तव अन्तिकम् सम्प्राप्तः।

समास—सिकतारेणवः=सिकतानाम् रेणवः (तत्पु०)। सख्यापरित्यक्ताः=सख्यया परित्यक्ताः (तत्पु०)। महात्मनः=महान् आत्मा यस्य तस्य (बहु०)।

व्या०—परिवर्जिताः=परि+णिजन्त 'वृज्' (वर्ज्)+इट् (इ)+क्त (त)। परित्यक्ता=परि+त्यज्+क्त (त)। आपन्न=आ+पद्+क्त (त)। सम्प्राप्त=सम्+प्र+आप्+क्त (त)।

शब्दार्थ—पर्जन्यस्य=मेघ की। दिवि=आकाश मे। सिकतारेणवः=बालू के कण। सख्यापरित्यक्ता=संख्यारहित, असंख्य। परम्=अत्यन्त, अधिक। निर्वेदम्=खेद, वैराग्य को। आपन्न=प्राप्त होकर। अन्तिकम्=पास। संप्राप्त=आया है।

हि० अनु०:—जिस प्रकार मेघ की जलधाराएँ (असख्य हैं), जिस प्रकार आकाश मे तारे (असख्य हैं) और जिस प्रकार बालू के कण सख्या से रहित अर्थात् असख्य हैं, उसी प्रकार इस महात्मा के गुण सख्या से मुक्त अर्थात् असख्य है, यह अत्यन्त वैराग्य को प्राप्त कर यहाँ तुम्हारे पास आया है।

मन्थरक आह—'किमस्य वैराग्यकारणम्।' वायस आह—'पृष्टो मया। परमनेनाभिहितम्, यद् बहु वक्तव्यमस्ति। तत्तत्रैव गत कथयिष्यामि। ममापि न निवेदितम्। तद् भद्र हिरण्यक, इदानीं निवेद्यतामुभयोरप्यावयोस्तदात्मनो वैराग्यकारणम्।' सोऽब्रवीत्—

समास —वैराग्यकारणम्=वैराग्यस्य कारणम् (तत्पु०)।

व्या० —वैराग्य=विराग+ष्यञ् (य)। अभिहितम्=अभि+धा+क्त (त)। धातु को 'हि' आदेश।

शब्दार्थ —वैराग्यकारणम्=वैराग्य का कारण। अभिहितम्=कहा। वक्तव्यम्=कहना। निवेदितम्=कहा। निवेद्यताम्=कहिए। आत्मनः=अपना।

हि० अनु० —मन्थरक बोला—'इसके वैराग्य का क्या कारण है?' कौआ बोला—मैंने पूछा, किन्तु इसने कहा कि बहुत कुछ कहना है, अत वही चलकर कहूँगा। मुझसे भी नही कहा है, सो भाई हिरण्यक, अब तुम हम दोनो से अपने वैराग्य के उस कारण को कहो।' वह बोला—

कथा १ (ताम्रचूडहिरण्यक कथा)

अस्ति दाक्षिणात्ये जनपदे महिलारोप्य नाम नगरम्। तस्य नातिदूरे मठायतन भगवत श्रीमहादेवस्य। तत्र च ताम्रचूडो नाम परिव्राजक प्रतिवसति स्म। स च नगरे भिक्षाटन कृत्वा प्राणयात्रा समाचरति। भिक्षाशेष च तत्रैव भिक्षापात्रे निधाय तद्भिक्षापात्र नागदन्तेऽवलम्ब्य पश्चात् रात्रौ स्वपिति। प्रत्यूषे च तदन्न कर्मकराणा दत्त्वा सम्यक् तत्रैव देवतायतने समार्जनोपलेपन-मण्डनादिकं समाज्ञापयति।

समासः—भिक्षाटनम्=भिक्षायाः अटनम् (तत्पु०)। देवतायतने=देवतायाः आयतने (तत्पु०)। संमार्जनोपलेपनमण्डनादिकम्=समार्जनम् च उपलेपनम् च मण्डनम् च (द्वन्द्व), तानि आदीनि यस्य तत् (बहु०)।

व्या०:—दाक्षिणात्ये=दक्षिणा+त्यक् (त्य)। निधाय=नि+धा+क्त्वा (ल्यप्=य)। अवलम्ब्य=अव+लम्ब्+क्त्वा (ल्यप्=य)। समाज्ञापयति='सम्+आ' पूर्वक चौरादिक 'ज्ञा' (ज्ञाप्) धातु, लट्, प्र० पु०, एक०।

शब्दार्थ—दाक्षिणात्ये=दक्षिण दिशा में होने वाले म। मठायतनम्=मठ, मन्दिर। परिव्राजकः=संन्यासी। प्रतिवसति स्म=रहता था। निधाय=रखकर। नागदन्ते=खूँटी पर। अवलम्ब्य=लटकाकर। प्रत्यूषे=प्रातःकाल। कर्मकराणाम्=काम करने वालों का, मजदूरों को। समार्जनोपलेपनमण्डनादिकम्=झाड़ लगाना, लीपना सजाना आदि। समाज्ञापयति=कराता है।

हि० अनु०:—दक्षिण दिशा के प्रदेश (दक्षिण प्रदेश) में महिलारोप्य नाम का नगर है। उसके समीप ही भगवान् श्रीमहादेव का मन्दिर है। वहाँ ताम्रचूड नाम का सन्यासी रहता था। वह नगर में भिक्षाटन कर जीवन यात्रा चलाता था। भिक्षा के (खाने से) बचे हुए अन्न को उसी भिक्षा-पात्र में रखकर, उस भिक्षा-पात्र को खूँटी पर लटकाने के बाद रात में सोता था। प्रातःकाल उस अन्न को काम करने वाले (मजदूरों) को देकर (उनसे) उस मन्दिर म झाड़ना, लीपना, सजाना आदि कार्य अच्छी तरह कराता था।

अन्यस्मिन्नहनि मम बान्धवैर्निवेदितम्—'स्वामिन्, मठायतने सिद्धान्नमूषकभयात् तत्रैव भिक्षापात्रे निहितं नागदन्तेऽवलम्बितं तिष्ठति सदैव। तद्वयं भक्षयितुं न शक्नुमः। स्वामिनः पुनरगम्यं किमपि नास्ति। तत्किं वृथाटनेनाद्य। अद्य तत्र गत्वा यथेच्छं भुञ्जामहे तव प्रसादात्। तदाकर्ण्याहं सकलयूथपरिवृतस्तत्क्षणादेव तत्र गतः। उत्पत्य च तस्मिन् भिक्षापात्रे समारूढः। तत्र भक्ष्यविशेषाणि सेवकानां दत्त्वा पश्चात् स्वयमेव भक्षयामि। सर्वेषां तृप्तौ जातायां भूयः स्वगृहं गच्छामि। एवं नित्यमेव तदन्नं भक्षयामि। परिव्राजकोऽपि यथाशक्ति रक्षति। परं यदैव निद्रान्तरितो भवति तदाहमारुह्यात्मकृत्यं करोमि।

समासः—सकलयूथपरिवृत =सकल च तद् यूथम् (कर्मधा०), तेन परिवृतः (तत्पु०)। भक्ष्यविशेषाणि=भक्ष्यस्य विशेषाणि। (तत्पु०)। निद्रान्तरितः= निद्रया अन्तरित. (तत्पु०)। आत्मकृत्यम्=आत्मनः कृत्यम् (तत्पु०)।

व्या०:—निवेदितम्=नि+णिजन्त 'विद्' (वेद)+इट् (इ)+क्त (त)। निहितम्=नि+धा+क्त (त), धातु को 'हि' आदेश। अवलम्बितम्=अव+लम्ब्+इट् (इ)+क्त (त)। भक्षयितुम्=भक्ष् (भक्षय्)+इट् (इ)+तुमुन् (तुम्)। परिवृतः=परि+वृ+क्त (त)। आरुह्य=आ+रुह्+क्त्वा (ल्यप्=य)।

शब्दार्थ —निवेदितम्=कहा। सिद्धम्=बनाया हुआ, पकाया हुआ। निहितम्=रक्खा हुआ। अवलम्बितम्=लटका हुआ। भक्षयितुम्=खाने को। अगम्यम्=पहुँचने के लिए कठिन। अटनेन=घूमने से। भुञ्जामहे=खावें। आकर्ण्य=सुन कर। सकलयूथपरिवृतः=सम्पूर्ण झुण्ड से घिरा हुआ। उत्पत्य=उछल कर। समारूढ़ः=चढ गया, बैठ गया। भक्ष्यविशेषाणि= विभिन्न भक्ष्य पदार्थों को। निद्रान्तरित.=निद्रा के वशीभूत। आरुह्य=चढ कर। आत्मकृत्यम्=अपना काम।

हि० अनु०:—अन्य किसी दिन मेरे बान्धवों ने कहा—'स्वामिन्, मन्दिर मे सिद्ध (पका हुआ) भोजन चूहों के डर से उसी भिक्षा-पात्र मे रक्खा हुआ और खूँटी पर लटका हुआ सदैव रहता है। इसलिए हम उसे खा नहीं सकते हैं। किन्तु आपके लिए कुछ अगम्य नही है। सो इधर-उधर बेकार भटकने से क्या! आज वहाँ जाकर आपकी कृपा से यथेष्ट भोजन करें। यह सुन कर मैं सम्पूर्ण झुण्ड के साथ उसी क्षण वहाँ गया। और उछल कर उस भिक्षा-पात्र पर चढ़ गया। उसमे से विभिन्न भक्ष्य पदार्थ सेवकों को देकर बाद मे मैंने स्वय भी खाए। सब की तृप्ति होने पर फिर अपने घर को आया। इस प्रकार नित्य ही उस अन्न को खाता था। वह सन्यासी भी यथाशक्ति (अन्न की) रक्षा करता था। लेकिन जभी वह निद्रा के वशीभूत हो जाता था, तभी मैं वहाँ चढ़ कर अपना काम करता था।

अथ कदाचित् तेन मम रक्षणार्थं महान् यत्न. कृतः। जर्जरवंशः

समानीत । तेन सुप्तोऽपि मम भयाद् भिक्षापात्र ताडयति । अहमप्यभक्षितेऽप्यन्ने प्रहारभयादपसर्पामि । एव तेन सह सकला रात्रि विग्रहपरस्य कालो व्रजति । अथान्यस्मिन्नहनि तस्य मठे बृहत्स्फिङ्नामा परिव्राजकस्तस्य सुहृत्तीर्थयात्राप्रसगेन पान्थ प्राघुणिक समायात । त दृष्ट्वा प्रत्युत्थानविधिना सभाव्य प्रतिपत्तिपूर्वक-मभ्यागतक्रियया नियोजित ।

समास —रक्षणार्थम् =रक्षणाय इदम् (नित्य तत्पु०) । जर्जरवश = जर्जरश्चासौ वश (कर्मधा०) । प्रहारभयात् =प्रहाराद् भयम् तस्मात् (तत्पु०) । विग्रहपरस्य=विग्रहे पर तस्य (तत्पु०) । बृहत्स्फिङ्नामा=बृहत्स्फिक् नाम यस्य स (बहु०) । तीर्थयात्राप्रसगेन=तीर्थाना यात्रा (तत्पु०), तस्या प्रसगेन (तत्पु०) । प्रत्युत्थानविधिना=प्रत्युत्थानस्य विधि. तेन (तत्पु०) । प्रतिपत्तिपूर्वकम् =प्रतिपत्ति पूर्वम् यस्य तत् । अभ्यागतक्रियया=अभ्यागतेभ्य क्रिया तया ।

धा० —कृत =कृ+क्त (त) । समानीत =सम्+आ+नी+क्त (त) । सुप्त =ष्वप् (स्वप्)+क्त (त) । अभक्षिते=नञ् (अ)+भक्ष्+इट् (इ)+क्त (त) । प्रहार=प्र+हृ+घञ् (अ) । प्रत्युत्थान=प्रति+उत्+स्था+ल्युट् (यु=अन) । विधिना=वि+धा+कि (इ) । सभाव्य=सम्+णिजन्त 'भू (भाव्)+क्त्वा (ल्यप्=य) नियोजित =नि+णिजन्त 'युज्' (योज्)+इट् (इ)+क्त (त) ।

शब्दार्थ —जर्जरवश =फटा बाँस । ताडयति=पीटता है (था) । प्रहारभयात् =चोट के भय से । अपसर्पामि=हट जाता हूँ (था) । विग्रहपरस्य= लड़ाई लड़ते हुए की । बृहत्स्फिङ्नामा=बृहत्स्फिक् नाम वाला । परिव्राजक = सन्यासी । पान्थ =पथिक । रास्तागीर । प्राघुणिक =अतिथि । प्रत्युत्थानविधिना=स्वागत की विधि से । सभाव्य=सम्मानित कर आवभगत कर प्रतिपत्तिपूर्वकम्=सम्मानपूर्वक । अभ्यागतक्रियया=आतिथ्य-सत्कार से । नियोजित.=युक्त किया ।

हि० अनु० —तब फिर कभी उसने मुझसे (अन्न की) रक्षा के लिए बड़ा यत्न किया । फटा बाँस मँगाया । उससे सोता हुआ भी मेरे डर से भीख के

बर्तन को पीटता था। मैं भी अन्न के बिना खाए हुए भी चोट के भय से हट जाता था। इस प्रकार उसके साथ पूरी रात लडाई करते हुए मेरा समय बीतता था। इसके बाद एक दिन उसके मठ मे उसका मित्र वृहत्स्फिक् नाम का सन्यासी, तीर्थयात्रा के प्रसग से पथिक के रूप मे अतिथि आया। उसको देखकर स्वागत की विधि से उसकी आवभगत कर सम्मानपूर्वक आतिथ्य-सत्कार से उसे युक्त किया (उसका आतिथ्य सत्कार किया)।

ततश्च रात्रावेकत्र कुशसस्तरे द्वावपि प्रसुप्तौ धमकथा कथयितुमारब्धौ।

हि० अनु०—इसके बाद रात मे वे दोनो एक ही कुश के विस्तर पर सोते हुए धमकथा कहने लगे।

अथ वृहत्स्फिक्कथागोष्ठीपु स ताम्रचूडो मूषकत्रासार्थं व्याक्षिप्तमना जर्जरवशेन भिक्षापात्र ताडयस्तस्य शून्यं प्रतिवचन प्रयच्छति। तन्मयो न किंचिदुदाहरति। अथासावभ्यागत पर कोपमुपागतस्तमुवाच—*'भोस्ताम्रचूड,* परिज्ञातस्त्व सम्यङ् न सुहृद्। तेन मया सह साह्लाद न जल्पसि। तद्रात्रावपि त्वदीय मठ त्यक्त्वान्यत्र मठे यास्यामि। उक्तं च—

समास—वृहत्स्फिक्कथागोष्ठीपु=वृहत्स्फिच कथागोष्ठ्य तासु (तत्पु०)। मूषकत्रासार्थम्=मूषकस्य त्रास (तत्पु०), तस्मै इदम् (नित्यतत्पु०)। व्याक्षिप्तमना=व्याक्षिप्तम् मन यस्य स (बहु०)।

व्या०—व्याक्षिप्त=वि+आ+क्षिप+क्त (त)। ताडयन्=तड् (ताडय्)+शतृ (अत्)। उपागत=उप+आ+गम्+क्त (त)। परिज्ञातः=परि+ज्ञा+क्त (त)। त्यक्त्वा=त्यज्+क्त्वा (त्वा)।

हि० अनु०—वृहत्स्फिक्कथागोष्ठीपु= वृहत्स्फिक् की कथागोष्ठियो म। मूषकत्रासार्थम्=चूहे को डराने के लिए। व्याक्षिप्तमना—अन्यमनस्क होकर, अनमना हाकर। ताडयन्=पीटता हुआ। प्रतिवचनम्=उत्तर। प्रयच्छति=देता है (था)। परिज्ञात=जान लिया गया। साह्लादम्=उल्लास के साथ। जल्पसि=बात करते हो।

हि० अनु०—इसके बाद वृहत्स्फिक् की बातों की बैठकों म वह ताम्रचूड

चूहे को डराने के लिए (बांसों से) मन हटाकर फटे बांस से भिक्षा-पात्र को पीटता हुआ उसको सूना उत्तर देता था। तन्मय (चूहे की तरफ लीन) हो कुछ भी नहीं कहता था। तब वह अतिथि अत्यन्त क्रुद्ध होकर उससे बोला—'हे ताम्रचूड़, तुझे जान लिया, तू सच्चा मित्र नहीं है। इसी से तुम मेरे साथ उल्लास से बात नहीं कर रहे हो। सो रात में भी (अभी) तेरे मठ को छोड़कर दूसरे मठ में जाता हूँ। कहा भी है—

> एह्यागच्छ समाश्रयासनमिदं कस्माच्चिराद् दृश्यसे,
> का वार्ता ह्यतिदुर्बलोऽसि कुशलं प्रीतोऽस्मि ते दर्शनात्।
> एवं ये समुपागतान् प्रणयिनः प्रह्लादयन्त्यादरात्,
> तेषां युक्तमशङ्कितेन मनसा हर्म्याणि गन्तुं सदा ॥६७॥

अन्वयः—एहि आगच्छ, इदम् समाश्रयासनम्, कस्मात् चिरात् दृश्यसे, का वार्ता हि अतिदुर्बलः असि, कुशलम्, ते दर्शनात् प्रीतः अस्मि, एवं ये प्रणयिनः समुपागतान् आदरात् प्रह्लादयन्ति, तेषाम् हर्म्याणि सदा अशङ्कितेन मनसा गन्तुम् युक्तम्।

सं० टी०:—एहि आगच्छ आगम्यताम् आगम्यताम्, इदम् पुरोवर्तमानम् समाश्रयासनम् उपवेशनाय आसनम् वर्तते कस्मात् कथम् चिरात् बहोः कालादनन्तरम् दृश्यसे दृष्टोऽसि, का वार्ता किम् कारणं वर्तते हि यतो हि अतिदुर्बलः कृशतरः असि, कुशलम् सर्वं शिवं तु वर्तते, ते तव दर्शनात् साक्षात्कारात् प्रीतः प्रसन्नः अस्मि, एवमनेन प्रकारेण ये प्रणयिनः स्नेहिनः जनाः समुपागतान् समागतान् अतिथीन् आदरात् सम्मानात् प्रह्लादयन्ति आनन्दयन्ति, तेषां प्रणयिनां जनानाम् हर्म्याणि भवनानि सदा सर्वदा अशङ्कितेन सकोचरहितेन मनसा चित्तेन गन्तुम् युक्तमुचितम् अस्तीति शेषः।

समासः—समाश्रयासनम्=सम्यग् आश्रयः समाश्रयः (कर्मधा०), तस्मै आसनम् (तत्पु०)। अतिदुर्बलः=अतिशयितः दुर्बलः (कर्मधा०),। अशङ्कितेन=न शङ्कितम् तेन (नञ् तत्पु०)।

व्या०:—प्रीत.=प्री+क्त (त)। प्रणयिनः=प्रणय+इनि (इन)। समुपागतान्=सम्+उप+आ+गम्+क्त (त)। प्रह्लादयन्ति='प्र'

णिजन्त 'ह्लाद' (ह्लादय्) धातु, लट्, प्र० पु०, बहु० । अशङ्कितेन=नञ् (अ)+शङ्का+इतच् (इत)। गन्तुम्=गम्+तुमुन् (तुम्)। युक्तम्=युज्+क्त (त)।

शब्दार्थ—समाश्रयासनम्=अच्छी तरह बैठने के लिए आसन। चिरात्=बहुत दिनो मे। दृश्यसे=दिखाई दिए हो। प्रीतः=प्रसन्न। प्रणयिन =स्नेही जन। समुपागतान्=आए हुओ को, अतिथियो को। प्रह्लादयन्ति=आनन्दित करते हैं। हर्म्याणि=घरो मे। अशङ्कितेन=सकोचरहित से।

हि० अनु० —आओ-आओ, यह अच्छी तरह (आराम से) बैठने के लिए आसन है, बहुत दिनो मे क्यो दीखे हो, क्या बात है कि बहुत दुर्बल हो रहे हो, कुशल तो है, तुम्हार दर्शन से मैं बहुत प्रसन्न हूं, इस प्रकार जो स्नेही जन समागत इप्ट मित्रो को आदर से आनन्दित करते हैं, उनके घरो मे सदा नि.सकोच मन से जाना ठीक है।

गृही यत्रागत दृष्ट्वा दिशो वीक्षेत वाप्यधः।
तत्र ये सदने यान्ति ते शृंगरहिता वृषाः ॥६८॥

अन्वयः—यत्र गृही आगतम् दृष्ट्वा दिशः अधः वा वीक्षेत, तत्र सदने ये यान्ति, ते शृंगरहिता वृषा. (सन्ति)।

समास —शृंगरहिताः=शृंगैः रहिताः (तत्पु०)।

व्या०.—वीक्षेत='वि' पूर्वक 'ईक्ष्' धातु, लिङ्, प्र० पु०, एक०।

शब्दार्थः—गृही=गृहस्थ, गृहस्वामी, घर का मालिक। वीक्षेत=देखे। दिश.=दिशाएं, बगलें। सदने=घर मे। शृंगरहिताः=बिना सीगो के।

हि० अनु०:—जहां घर का मालिक समागत (अतिथि) को देखकर बगलें भांके या नीचे को देखे, उस घर मे जो जाते हैं, वे बिना सीगो के बैल हैं।

नाभ्युत्थानक्रिया यत्र नालापाः मधुराक्षराः।
गुणदोषकथा नैव तत्र हर्म्ये न गम्यते ॥६६॥

अन्वय—(सीधा व स्पष्ट है)।

समास—अभ्युत्थानक्रिया—अभ्युत्थानस्य क्रिया (तत्पु०)। मधुराक्षराः =मधुराणि अक्षराणि येषु ते (बहु०) गुणदोषकथा=गुणाश्च दोषाश्च (द्वन्द्व), तयोः कथा (तत्पु०)।

व्या०—अभ्युत्थान=अभि+उत्+स्था+ल्युट् (यु=अन)।

शब्दार्थः—अभ्युत्थानक्रिया=स्वागत की क्रिया (कार्यवाही) आलापाः= बातचीत। मधुराक्षरा=मीठे शब्दों वाले। गुणदोषकथा=गुण और दोषों की बातें। गम्यते=जाया जाता है।

हि० अनु०—जहाँ स्वागत-क्रिया (स्वागत की औपचारिकता) नहीं है, मीठे शब्दों से युक्त सम्भाषण नहीं हैं। गुण और दोषों की बातें नहीं हैं, उस घर में नहीं जाया जाता है। नहीं जाना चाहिए।

तदेकमठप्राप्त्यापि त्वं गर्वितः। त्यक्तः सुहृत्स्नेहः। नैतद्वेत्सि यत्त्वया मठाश्रयव्याजेन नरकोपार्जनं कृतम्। उक्तं च—

हि० अनु०—सो तू एक मठ की प्राप्ति से ही गर्वित हो गया है। मित्र-प्रेम छोड़ दिया। तू यह नहीं जानता है कि तूने मठ के आश्रय के बहाने (रूप से) नरक का उपार्जन किया है। कहा भी है—

> नरकाय मतिस्ते चेत् पौरोहित्यं समाचर।
> वर्षं यावत् किमन्येन मठचिन्ता दिनत्रयम् ॥७०॥

अन्वय—नरकाय ते मतिः चेत् वर्षम् यावत् पौरोहित्यम् समाचर, अन्येन किम्, दिनत्रयम् मठचिन्ताम् (समाचर)।

समास—पौरोहित्यम्=पुरोहितस्य भावः कर्म वा (तद्धित)। मठचिन्ताम् =मठस्य चिन्ताम् (तत्पु०)।

व्या०—पौरोहित्यम्=पुरोहित+यक् (य)।

हि० अनु०—नरक जाने के लिए यदि तेरा विचार है तो एक वर्ष पुरोहित का काम कर, अथवा अन्य (बातों) से क्या, तीन दिन मठ की देख-भाल कर।

विशेष —श्लोक का तात्पर्य है कि इन दोनो कामो मे ऐसे अपराधो के लिए बहुत ही सुलभ अवसर मिलते रहते हैं, जिनसे नरक-गमन हो सकता है।

तन्मुख, शोचितव्यस्त्व गर्व गतः। तदहं त्वदाय मठ परित्यज्य यास्यामि।' अथ तच्छ्रुत्वा भयत्रस्तमनास्ताम्रचूडस्तमुवाच—'आः भगवन्, मैव वद। न त्वत्समोऽन्यो मम सुहृत्कश्चिदस्ति। पर तच्छ्रूयता गोष्ठीशैथिल्यकारणम्। एष दुरात्मा मूषक प्रोन्नतस्थाने धृतमपि भिक्षापात्रमुत्प्लुत्यारोहति, भिक्षाशप च तत्रस्थ भक्षयति। तदभावादेव मठे मार्जनक्रियापि न भवति। तन्मूषकत्रासायमेतेन वशेन भिक्षापात्र मुहुर्मुहुस्ताडयामि, नान्यत्कारणमिति। अपरमेतत् कुतूहल पश्यास्य दुरात्मनो यन्मार्जारमर्कटादयोऽपि तिरस्कृता अस्योत्पतनेन।' बृहत्स्फिगाह—'अथ ज्ञायते तस्य बिल कस्मिश्चित्प्रदेशे।' ताम्रचूड आह—'भगवन् न वेद्मि सम्यक्।' स आह—नून' निधानस्योपरि तस्य बिलम्। निधानोष्मणा प्रकूर्दते। उक्त च—

समास—भयत्रस्तमना=भयेन त्रस्त मन यस्य स (बहु०)। त्वत्सम=त्वया सम (तत्पु०)। **गोष्ठीशैथिल्यकारणम्**=गोष्ठया शैथिल्यम् (तत्पु०), तस्य कारणम् (तत्पु०) **प्रोन्नतस्थाने**=प्रोन्नत च तत स्थानम् तस्मिन् (कमधा०)। **निधानोष्मणा**=निधानस्य ऊष्मा तेन (तत्पु०)।

धा०—शोचितव्य =शुच्+इट् (इ)+तव्य। **परित्यज्य**=परि+त्यज्+क्त्वा (ल्यप्=य)। **शैथिल्य**=शिथिल+ष्यञ् (य) **प्रोन्नत**=प्र+उद्+नम्+क्त (त) **धृतम्**=धृ+क्त (त)। **उत्प्लुत्य**=उत्+प्लु+तुक् (त्)++क्त्वा (ल्यप्=य)। **तिरस्कृता** =तिरस्+कृ+क्त (त)। **उत्पतनेन**=उत्+पत्+ल्युट् (यु=अन)।

शब्दार्थ—**शोचितव्य**=शोचनीय, खेद या सोच करने योग्य, दयनीय। **परित्यज्य**=छोड कर। **भयत्रस्तमनाः**=भयभीत चित्त वाला। **गोष्ठीशैथिल्यकारणम्**=बैठक या बातचीत की शिथिलता का कारण। **प्रोन्नतस्थाने**=अधिक ऊँचे स्थान पर। **उत्प्लुत्य**=उछल कर। **आरोहति**=चढ जाता है। **मार्जन क्रिया**=झाडना बुहारना। **मूषकत्रासार्थम्**=चूहे को डराने के लिए। **कुतूहलम्**=आश्चर्य, आश्चर्यजनक बात। **तिरस्कृता** =अपमानित, मात खा गए हैं।

उत्पतनेन=उछलने स । निधानस्य=खज़ाने के, धनकोष के । निधानोष्मणा=धनकोष (खज़ाने) की गर्मी से ।

हि० अनु० —सो मूस, तू शोचनीय (दयनीय) होते हुए भी गर्व को प्राप्त हो गया है । अत मैं तेरे मठ को छोड कर जाता हूँ । यह सुनकर, भयभीत चित्त वाला ताम्रचूड उससे बोला—'हे भगवन्, ऐसा मत कहो । तुम्हारे समान दूसरा मेरा कोई सुहृत् नहीं है । लेकिन गोष्ठी (बैठक या बातचीत) की शिथिलता का कारण सुनो । यह दुष्ट चूहा अधिक ऊँचे स्थान पर रखे हुए भी भिक्षापात्र पर उछल कर चढ जाता है और उसमे रक्खे हुए भिक्षाशेष (खान मे बचे भीख के अन्न) को खा जाता है । इसी कारण मठ मे झाडने-बुहारन का कार्य भी नही हो पाता है । सो चूहे को डराने के लिए मैं इस बास से भिक्षापात्र को बार-बार पीटता हूँ, दूसरा कोई कारण नही है । दूसरे, इस चूहे की यह अद्भुत बात देखो कि इसके उछलने से बिलाव एव बन्दर आदि भी मात खा गए हैं । बृहत्स्फिक बोला—'क्या यह ज्ञात है कि इसका बिल किस स्थान पर है ।' ताम्रचूड बोला—'मैं ठीक तरह नही जानता हूँ ।' वह बोला—'निश्चय ही धनकोष (खजाने) के ऊपर उसका बिल है । खजाने की गर्मी से यह कूदता है । कहा भी है—

> ऊष्मापि वित्तजो वृद्धि तेजो नयति देहिनाम् ।
> किं पुनस्तस्य सभोगस्त्यागकर्मसमन्वित ॥७१॥

अन्वय —वित्तज ऊष्मा अपि देहिनाम् तेज वृद्धिम् नयति, पुन तस्य त्यागकर्मसमन्वित सभोग किम् ।

समास —वित्तज =वित्तात् जायत (उपपदतत्पु०) । त्यागकर्मसमन्वित =त्यागस्य कर्म (तत्पु०), तेन समन्वित (तत्पु०) ।

व्या० —वित्तज =वित्त+जन्+ड (अ) । देहिनाम्=देह+इनि (इन्) । सभोग =सम्+भुज+घञ् (अ) । त्याग=त्यज+घञ् (अ) । समन्वित =सम्+अनु+इ+क्त (त) ।

शब्दार्थ —ऊष्मा=गर्मी । वित्तज =धन से उत्पन्न होने वाला ।

सभोग =उपभोग। त्यागकर्मसमन्वित =त्याग के कम (त्यागरूप कर्म) से युक्त।

हि० अनु० —धन से पैदा होने वाली गर्मी भी प्राणियों के तेज मे वृद्धि कर देती है, फिर उसके त्याग कर्म के साथ उपभोग का क्या कहना (वह तो और भी अधिक तेज बढाता है)।

तथा च।

हि० अनु० —और भी।

नाकस्माच्छाण्डिली मार्तविक्रीणाति तिलैस्तिलान्।
लुञ्चितानितरैर्येन हेतुरत्र भविष्यति ॥७२॥

अन्वय —मात, शाण्डिली लुञ्चितान् तिलान् इतरै तिलै अकस्मात् न विक्रीणाति येन अत्र हेतु भविष्यति।

व्या० —लुञ्चितान्=लुञ्च्=इट् (इ)+क्त (त)।

शब्दार्थ —शाण्डिली=इस नाम की स्त्री, शाण्डिल्य गोत्रोत्पन्न स्त्री। लुञ्चितान्=छिले हुओ को। विक्रीणाति=बेचती है। अकस्मात्=यो ही बिना कारण ही।

हि० अनु० —हे मात शाण्डिली (अपने) छिले हुए तिलो को अन्य प्रकार के (बिना छिले) तिलो से यो ही (बिना कारण ही) नही बेचती है, अत इस विषय मे कोई अवश्य हेतु होगा।

विशेष —यह अग्रिम अवान्तर कथा का सकेत श्लोक है, जिसका बीज इस मे निहित है।

ताम्रचूड आह—'कथमेतत्।' स आह—

हि० अनु ०—ताम्रचूड बोला—यह कैसे है।' वह बोला—

कथा २ (चतुर ब्राह्मणी कथा)

यदाह कस्मिश्चित् स्थाने प्रावृटकाले व्रतग्रहणनिमित्त कश्चिद् ब्राह्मण वासाय प्रार्थितवान्। ततश्च तद्वचनात् तेनापि शुश्रूषित सुखेन देवार्चन परस्तिष्ठामि। अथान्यस्मिन्नहनि प्रत्यूषे प्रबुद्धोऽह ब्राह्मणब्राह्मणीसवादे

दत्तावधानः शृणोमि । तत्र ब्राह्मण आह—'ब्राह्मणि, प्रभाते दक्षिणायनसंक्रान्ति-रनन्तदानफलदा भविष्यति । तदहं प्रतिग्रहार्थं ग्रामान्तरं यास्यामि । त्वया ब्राह्मणस्यैकस्य भगवतः सूर्यस्योद्देशेन किंचिद् भोजनं दातव्यम्' इति । अथ तच्छ्रुत्वा ब्राह्मणी परुषतरवचनैस्तं भर्त्संयमाना प्राह—'कुतस्ते दारिद्र्योपहतस्य भोजनप्राप्तिः । तत्किं न लज्जसे एवं ब्रुवाणः । अपि च न मया तव हस्तलग्नया क्वचिदपि लब्धं सुखम् । न मिष्टान्नस्यास्वादनम्, न च हस्तपादकण्ठादिभूषणम् ।' तच्छ्रुत्वा भयत्रस्तोऽपि विप्रो मन्दं मन्दं प्राह—'ब्राह्मणि, नैतद्युज्यते वक्तुम् । उक्तं च—

समास—व्रतग्रहणनिमित्तम्=व्रतस्य ग्रहणम् (तत्पु०), तस्य निमित्तम् (तत्पु०) । देवार्चनपर=देवानाम् अर्चनम् (तत्पु०), तस्मिन् पर (तत्पु०) । दत्तावधान=दत्तम् अवधानम् येन स. (बहु०) । दक्षिणायनसंक्रान्ति= दक्षिणम् अयनम् (कर्मधा०), तस्य संक्रान्ति (तत्पु०) । अनन्तदानफलदा= अनन्तम् दानम् (कर्मधा०) तस्य फलम् (तत्पु०), तद् ददाति (उपपदतत्पु०) । परुषतरवचनै=अतिशयेन परुषाणि परुषतराणि (तद्धित) तानि च तानि वचनानि तैः (कर्मधा०) दारिद्र्योपहतस्य=दारिद्र्येन उपहत तस्य (तत्पु०) ।

व्या०—प्रार्थितवान्=प्र+अर्थ्+इट् (इ)+क्तवतु(तवत्) । शुश्रूषित= सन्नन्त 'श्रु' (शुश्रूष्)+इट् (इ)+क्त (त) । प्रबुद्ध=प्र=बुध्+क्त (त) । अवधान=अव+धा+ल्युट (यु=अन) । अनन्तदानफलदा=अनन्तदानफल+ दा+क (अ)+टाप् (आ) । दातव्यम्=दा+तव्य । भर्त्संयमाना=भर्त्स् (भर्त्सय्)+शप् (अ)+मुक् (म्)+शानच् (आन)+टाप् (आ) । दरिद्र्य= दरिद्र+ष्यञ् (य) । उपहतस्य=उप+हन+क्त (त) । ब्रुवाण=ब्रू+ शानच् (आन) । लब्धम्+लभ्+क्त (त) । वक्तुम्=ब्रू (वच्)+तुमुन् (तुम्) ।

शब्दार्थ—प्रावृट्काले=वर्षाकाल में । व्रतग्रहणनिमित्तम्=व्रत के ग्रहण के लिए । प्रार्थितवान्=प्रार्थना की । शुश्रूषित=सेवित । दत्तावधान=ध्यान देकर । दक्षिणायनसंक्रान्ति=सूर्य के दक्षिणायन होने का समय, सूर्य का

कक राशि पर सङ्क्रमण का काल । अनन्तदानफलदा=अनन्तदान का फल देने वाली । प्रतिग्रहायम्=दान लेने के लिए । परुषतरवचनैः=अति कठोर वचनों से । भर्त्संयमाना=फटकारती हुई । दारिद्र्योपहतस्य=गरीबी से पीडित का । हस्तलग्नया=हाथ लगा हुई । हस्तपादकण्ठादिभूषणम्=हाथ, पैर, गर्दन आदि का गहना ।

हि० अनु०—एक बार मैंने किसी स्थान पर वर्षा के समय व्रत-ग्रहण (अनुष्ठान) के लिए किसी ब्राह्मण से रहने (के स्थान) के लिए प्रार्थना की। तब उस वचन से उस (ब्राह्मण) के द्वारा भी सेवित होकर मैं सुख से देवपूजा करता हुआ (उसके यहाँ) रहने लगा। इसके बाद एक दिन प्रातःकाल जग कर मैंने ब्राह्मण और ब्राह्मणी के वार्तालाप में ध्यान देकर सुना। उसमें ब्राह्मण बोला—'ब्राह्मणि, प्रातःकाल दक्षिणायन (कर्क) की सङ्क्रान्ति अनन्त दान का फल देनी वाली होगी। सो मैं तो दान लेने के लिए दूसरे गाँव जाऊँगा। तुम एक ब्राह्मण को सूर्य भगवान् के उद्देश्य (निमित्त) से कुछ भोजन दे देना।' यह सुन कर ब्राह्मणी अति कठोर वचनों से उसे फटकारती हुई बोली—'गरीबी से मारे हुए तुम्हारे यहाँ कहाँ से भोजन मिलेगा। सो ऐसा कहते हुए क्या तुम्हें लज्जा नहीं आती। इसके अतिरिक्त, तुम्हारे हाथ में पडकर मैंने कभी सुख नहीं पाया। न तो मिष्टान्न का आस्वादन किया, और न हाथ, पैर एवं गर्दन आदि के गहने पाए। यह सुन कर भयभीत होकर भी ब्राह्मण धीरे-धीरे बोला—'ब्राह्मणि, यह कहना ठीक नहीं है। कहा भी है—

> ग्रासादपि तदर्धं च कस्मान्नो दीयतेऽर्थिषु।
> इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥७३॥

अन्वय—ग्रासात् अपि तदर्धम् च कस्मात् अर्थिषु न दीयते, इच्छानुरूपः विभवः कस्य कदा भविष्यति।

समास—इच्छानुरूप=इच्छाया अनुरूपः (तत्पु०)।

व्या०—दीयते='दा' धातु, कर्मवाच्य, लट्, प्र० पु०, एक।

शब्दार्थ—ग्रासात्=ग्रास (कौर) से। अर्थिषु=चाहने या माँगने वालों को।

इच्छानुरूप.=इच्छा के अनुसार, मनचाहा।

हि० अनु०—एक ग्राम (कवल या कौर) से भी उसका आधा क्यो न मागने वालो को दिया जावे ? (क्योंकि) मन चाहा ऐश्वर्य तो किसको कब प्राप्त हो सकता है।

ईश्वरा भूरिदानेन यल्लभन्ते फल किल।
दरिद्रस्तच्च काकिण्या प्राप्नुयादिति न श्रुति. ॥७४॥

अन्वय:—ईश्वरा भूरिदानेन यत् फलम् लभन्ते किल, तत् च दरिद्र. काकिण्या प्राप्नुयात् इति न श्रुति.।

समासः—भूरिदानेन=भूरि च तद् दानम् तेन (कर्मधा०)।

व्या०:—प्राप्नुयात्='प्र' पूर्वक 'आप्' धातु, लिङ्, प्र० पु०, एक०।

शब्दार्थः—ईश्वरा·=भाग्यवान्, धनवान्। भूरिदानेन=विपुलदान स। लभन्ते=प्राप्त करते हैं। काकिण्या=कौडी से। प्राप्नुयात्=प्राप्त करता है। किल=निश्चय ही।

हि० अनु०:—धनवान् विपुल दान से जो फल प्राप्त करते हैं, उसे दरिद्र एक कौडी के दान से निश्चय ही प्राप्त करता है, ऐसी हमारी श्रुति (वेदवाक्य, या परम्परागत प्रसिद्धि) है।

दाता लघुरपि सेव्यो भवति न कृपणो महानपि समृद्धया।
कूपोऽन्त स्वादुजल प्रीत्यै लोकस्य न समुद्र· ॥७५॥

अन्वय—दाता लघु अपि सेव्य भवति, कृपणः समृद्धया महान् अपि न (सेव्यो भवति)। अन्त स्वादुजल. कूप. लोकस्य प्रीत्यै (भवति), समुद्र. न (भवति)।

समासः—अन्त स्वादुजलः=अन्त स्वादु जलम् यस्य स (बहु०)।

व्या०·—दाता=दा+तृच् (तृ)। सेव्य=सेव्+ण्यत् (य)।

शब्दार्थ—कृपणः=कजूस। समृद्धया=सपत्ति से, वैभव से। अन्त-स्वादुजल=जिसके भीतर स्वादिष्ट जल है।

हि० अनु० —दान देने वाला छोटा व्यक्ति भी सेवनीय होता है, कजूस सम्पत्ति स बडा होने पर भी सेवनीय नही होता। अपने भीतर स्वादिष्ट जल रखने वाला कुआ लोगो की प्रसन्नता के लिए होता है किन्तु समुद्र (ऐसा) नही होता (क्योकि उसका जल खारा होता है जो कि किसी के काम नही आ सकता)।

तथा च।

हि० अनु० —और भी।

अकृतत्यागमहिम्ना मिथ्या किं राजराजशब्देन।
गोप्तार न निधीना कथयन्ति महेश्वर विबुधा ॥७६॥

अन्वय —अकृतत्यागमहिम्ना मिथ्या राजराजशब्देन किम् विबुधा निधीनाम् गोप्तारम् महेश्वरम् न कथयन्ति।

समास —अकृतत्यागमहिम्ना=त्यागस्य महिमा (तत्पु०), अकृत त्याग महिमा यस्मिन् (बहु०) अथवा कृतश्चासौ त्याग (कमधा०) तस्य महिमा (तत्पु०), नास्ति कृतत्यागमहिमा यस्मिन (बहु०)। राजराजशब्देन= राजराजश्चासौ शब्द तेन (कमधा०)। महेश्वरम्=महान् च असौ ईश्वर तम् (कमधा०)।

व्या० —गोप्तारम—गुप्+तृच् (तृ)।

शब्दाथ —त्याग की महिमा को सपादित (अर्जित) किए बिना मिथ्या (व्यथ के) 'राजराज' शब्द से क्या (प्रयोजन) विद्वज्जन निधियो (खजानो) के रक्षक को महेश्वर नही कहते हैं (महेश्वर तो वही कहलाएगा जो मालिक होता हुआ दान आदि मे खच भी कर सके, अन्य जन तो खजाने के केवल पहरेदार आदि ही होते हैं)।

हि० अनु० —और भी।

सदा दानपरिक्षीण शस्त एव करीश्वर।
अदान पीनगात्रोऽपि निन्द्य एव हि गर्दभ ॥७७॥

अन्वय —सदा दानपरिक्षीण करीश्वर शस्त एव, अदान गदभ पीनगात्र अपि निन्द्य एव।

समासः—दानपरिक्षीणः—दानेन परिक्षीणः (तत्पु०)। करीश्वरः—करीणाम् ईश्वरः (तत्पु०)। अदानः—नास्ति दानम् यस्य सः (बहु०)। पीनगात्रः—पीनम् गात्रम् यस्य सः (बहु)।

व्या०:—शस्तः—शसु (शस्)+क्त (त)। निन्द्यः—णिदि (निन्द्)+ण्यत् (य)।

शब्दार्थः—दानपरिक्षीणः—दान (मद) के स्राव से दुर्बल। करीश्वरः—गजराज। शस्त—प्रशसनीय। अदानः—दानरहित। पीनगात्रः—मोटे शरीर वाला। निन्द्यः—निन्दनीय।

हि० अनु०:—मदा दान या मद के स्राव के कारण दुर्बल होने पर भी गजराज प्रशसनीय ही होता है, किन्तु दानरहित गधा मोटे शरीर का होने पर भी निन्दनीय ही होता है।

विशेष.—यहाँ 'दान' शब्द मे श्लेष है, इसका जहाँ सामान्य अर्थ देना है, वहाँ विशिष्ट अर्थ हाथी का मद है। यतः हाथी मद के स्राव मे दुर्बल होता रहता है, अतः उसे 'मदपरिक्षीणः' कहा जा सकता था, किन्तु यहाँ चमत्कार के लिए 'मद' के दूसरे पर्यायवाची शब्द 'दान' का प्रयोग किया गया है। जिससे शाब्दिक रूप से यह सूचित होता है कि वह 'दान' से दुर्बल हो जाता है और फलतः दान की महिमा सूचित हो जाती है। 'गर्दभ' के लिए प्रयुक्त 'अदान.' शब्द मे 'दान' का अर्थ सामान्य ही माना जा सकता है, जिसका तात्पर्य हुआ कि वह किसी को कुछ नहीं देता, अपितु अपना ही पेट भरता रहता है और फलत. लोग उसकी निन्दा ही करते हैं और इसीलिए ऐसे व्यक्ति को भी गधे की उपमा द देते हैं।

सुशीलोऽपि सुवृत्तोऽपि यात्यदानादधो घट.।
पुन. कुब्जापि काणापि दानादुपरि कर्करी ॥७८॥

अन्वय.—सुशीलः अपि सुवृत्त अपि घट. अदानाद् अधो याति, पुन कुब्जा अपि काणा अपि कर्करी दानाद् उपरि (याति)।

समासः—सुशील —शोभन शील यस्य स. (बहु०)। सुवृत्तः—शोभन वृत्त यस्य स (बहु०)।

शब्दार्थ —सुशील =अच्छे स्वभाव वाला, अच्छा शील (सीलन) वाला, ठण्डा। सुवृत्त =अच्छे आचरण वाला, अच्छी तरह गोल। अदानात्=दान के बिना। कुब्जा=कुबडी। काणा=कानी। ककरी=टोंटी वाला जलपात्र।

हि० अनु० —सुशील (अच्छे स्वभाव वाला, ठण्डा) और सुवृत्त (अच्छे आचरण वाला, अच्छी तरह गोल बना हुआ) भी घडा दान के बिना (देने को पानी न रखने के कारण खाली होने से) (कुए मे) नीचे को जाता है किन्तु कुबडी और कानी भी ककरी भी दान के कारण (देने को अपने पास पानी रखने के कारण) ऊपर को जाती है।

विशेष—श्लोक का तात्पर्य है कि घडा सब प्रकार से ठीक होने पर खाली होने के कारण नीचे कुँए मे पटका जाता है और ककरी कानी कुबडी भी होते हुए ऊपर को की जाती है, क्योंकि एक (घडे) के पास देने को कुछ नहीं है और दूसरे (ककरी) के पास देने को कुछ है। 'सुशील' एवं 'सुवृत्त' शब्द श्लिष्ट हैं।

यच्छञ्जलमपि जलदो वल्लभतामेति सकललोकस्य।
नित्य प्रसारितकरो मित्रोऽपि न वीक्षितु शक्य ॥७६॥

अन्वय —जलम् अपि यच्छन् जलद सकललोकस्य वल्लभताम् एति, नित्यम् प्रसारितकर मित्र अपि वीक्षितुम् न शक्य।

समास —सकललोकस्य=सकलश्चासौ लोक तस्य (कर्मधा०), जलद = जलम् ददाति (उपपदतत्पु०)। प्रसारितकर =प्रसारिता करा येन स (बहु०)।

व्या० —यच्छन्= दाण (यच्छ्)+शतृ (अन्)। जलद =जल+दा+क (अ)। प्रसारित=प्र+णिजन्त सृ (सार्)+इट (इ)+क्त (त)। वीक्षितुम=वि+ईक्ष+इट (इ)+तुमुन् (तुम्)। शक+यत् (य)।

शब्दार्थ —यच्छन्=देता हुआ। वल्लभताम्=प्रियत्व, प्यार।

प्रसारितकर =हाथ फैलाने वाला, किरणो को फैलाने वाला। मित्र = सूर्य।

हि० अनु०:—जल को भी देने वाला जलद (मेघ) सम्पूर्ण लोक के प्यार को प्राप्त करता है, किन्तु करो (किरणो) को नित्य फैलाने वाले सूर्य को देखना भी (लोक के लिए) अशक्य है ।

विशेष:—श्लोक का तात्पर्य है कि जो लोगो को दान देता है, वह उनका प्रिय बन जाता है, और जो उनसे मांगने के लिए उनके समक्ष हाथ फैलाता है, उसे वे देखना भी नही चाहते । यतः मेघ जल देता है, अत: वह सम्पूर्ण लोक का प्रिय बनता है और अत सूर्य कर फैलाता है, अतः उसे लोग आँख मिलाकर नही देखते । यद्यपि उसे देख तो इसलिए नही सकते कि उसमे तेज अधिक होता है, किन्तु कवि यह चमत्कारपूर्ण कल्पना करता है कि वह कर फैलाता है, अतः उसे लोग नहीं देखते । यहाँ 'कर' शब्द म श्लेष है, अत. इस चमत्कार की पूर्ति होगई है । 'कर' शब्द के 'हाथ' और 'किरण' अर्थ हैं, सूर्य अपनी किरणें फैलाता है, अत यह कहा गया है कि वह 'कर' फैलाता है, 'कर' का फैलाना मागने के लिए होता है, अतः सूचित होता है कि सूर्य मागने के लिए 'कर' फैलाता है । इसके अतिरिक्त सूर्य की किरणें सूर्य की हाथ ही मानी जाती हैं, और वह इन हाथो को फैलाकर लोक को कुछ देता नही, अपितु लोक के जल का शोषण ही करता है । यद्यपि 'सखा' का पर्याय वाची 'मित्र' शब्द नपु सक लिंग होता है, किन्तु यदि उसे कथंचित् पु लिंग मान लिया जावे तो साथ मे यह भी अर्थ निकलने लगता है कि हमेशा हाथ फैलाने वाले मित्र को लोग देखना भी नही चाहते ।

इस प्रकार इस श्लोक के उत्तरार्द्ध मे श्लेष के कारण अपूर्व चमत्कार की सृष्टि होगई है ।

एव ज्ञात्वा दारिद्र्याभिभूतैरपि स्वल्पात्स्वल्पतर काले पात्रे च देयम् । उक्तं च—

हि० अनु०:—ऐसा जानकर गरीबी से पीडित लोगो को भी थोडे मे से भी थोडा उचित समय म योग्य व्यक्ति को दान देना चाहिए । कहा भी है—

सत्पात्र महती श्रद्धा देशे काले यथोचिते ।
यद्दीयते विवेकज्ञैस्तदानन्त्याय कल्पते ।।८०।।

अन्वय —सत्पात्रम्, महती श्रद्धा, यथोचिते देशे काले विवेकज्ञै यद् दीयते, तद् आनन्त्याय कल्पते ।

समास —विवेकज्ञै =विवेकम् जानन्ति (उपपदतत्पु०) ।

व्या० —विवेकज्ञ =विवेक+ज्ञा+क (अ) । आनन्त्याय=अनन्त+ष्यञ् (य) ।

शब्दार्थ —विवेकज्ञ =सत् और असत का भेद समझने वाले बुद्धिमान् व्यक्तियों के द्वारा ।

हि० अनु० —(जिसको दान दिया जाय वह) योग्य पात्र हो, अधिक श्रद्धा हो तो उचित देश और काल मे विवेकी बुद्धिमान् व्यक्तियो के द्वारा जो कुछ दिया जाता है, वह अनन्त फल देने के लिए समर्थ होता है ।

तथा च ।

हि० अनु० —और भी ।

अतितृष्णा न कर्तव्या तृष्णा नैव परित्यजत् ।
अतितृष्णाभिभूतस्य शिखा भवति मस्तके ।।८२।।

अन्वय —(सीधा व स्पष्ट है) ।

समास —अतितृष्णाभिभूतस्य=अतिशयिता तृष्णा (कमधा०), तया अभिभूतस्य (तत्पु०) ।

व्या —कर्तव्या=कृ+तव्य+टाप् (आ) ।

हि० अनु० =अधिक तृष्णा नही करनी चाहिए और तृष्णा का बिल्कुल छोडना भी नही चाहिए । अधिक तृष्णा के वशीभूत के मस्तक पर शिखा होती है ।

विशेष —यह अग्रिम कथा का सकेत श्लोक है ।

ब्राह्मण्याह—'कथमेतत् ।' स आह—

हि० अनु० —ब्राह्मणी बोली—यह कैसे ? वह बोला—

कथा ३ (अतितृष्णशृगाल कथा)

अस्ति कस्मिश्चिद्वनोद्देशे कश्चित्पुलिन्द स । च पापर्द्धि कर्तु वन प्रति प्रस्थित । अथ तेन प्रसर्पता महानञ्जनपर्वतशिखराकारः क्रोड समासादित ।

तं दृष्ट्वा कर्णान्ताकृष्टनिशितसायकेन समाहतः। तेनापि कोपाविष्टेन चेतसा बालेन्दुद्युतिना दंष्ट्राग्रेण पाटितोदरः पुलिन्दो गतासुर्भूतलेऽपतत्। अथ लुब्धक व्यापाद्य शूकरोऽपि शरप्रहारवेदनया पञ्चत्वं गतः। एतस्मिन्नन्तरे कश्चिदासन्नमृत्युः शृगाल इतस्ततो निराहारतया पीडितः परिभ्रमंस्तं प्रदेशमाजगाम। यावद्वराहपुलिन्दौ द्वावपि पश्यति तावत्प्रहृष्टो व्यचिन्तयत्—'भोः, सानुकूलो मे विधिः। तेनैतदप्यचिन्तितं भोजनमुपस्थितम्। अथवा साध्विदमुच्यते—

समासः—वनोद्देशे=वनस्य उद्देशे (तत्पु०)। पापर्द्धिम्=पापस्य ऋद्धिम् (तत्पु०)। अञ्जनपर्वतशिखराकारः=अञ्जनः पर्वतः (कर्मधा०), तस्य शिखरम् (तत्पु०)। तद्वद् आकारः यस्य सः (बहु०)। कर्णान्ताकृष्टनिशितसायकेन= कर्णयोरन्तः (तत्पु०), तम् आकृष्टम् (तत्पु०)। तत् निशितम् सायकम् तेन (कर्मधा०)। कोपाविष्टेन=कोपेन आविष्टेन (तत्पु०)। बालेन्दुद्युतिना= बालश्च असौ इन्दुः (कर्मधा०), तस्य द्युतिः इव द्युतिः यस्य तेन (बहु०)। पाटितोदरः=पाटितम् उदरम् यस्य सः (बहु०)। गतासुः=गताः असवः यस्य सः (बहु०)। शरप्रहारवेदनया=शरेण प्रहारः (तत्पु०), तेन वेदना तया (तत्पु०)। आसन्नमृत्युः=आसन्नः मृत्युः यस्य सः (बहु०)। निराहारतया= नास्ति आहारः यस्य सः (बहु०), तस्य भावः निराहारता तया (तद्धित)।

रूपाः—प्रसर्पता=प्र+सृप्+शतृ (अत्)। समासादितः=सम्+आ +सद् (साद्)+इट् (इ)। समाहतः=सम्+आ+हन्+क्त (त)। व्यापाद्य =वि+आ+णिजन्त 'पद्' (पाद्)+क्त्वा (ल्यप्=य)। परिभ्रमन्=परि+ भ्रम्+शतृ (अत्) प्रहृष्टः=प्र+हृष्+क्त (त)।

शब्दार्थः—वनोद्देशे=वन के स्थान में, वन्य प्रदेश में। पुलिन्दः= बहेलिया। पापर्द्धिम्=पाप की वृद्धि को। प्रसर्पता=घूमते हुए। अञ्जनपर्वतशिखराकार.=अञ्जन गिरि (कज्जल गिरि) के शिखर के समान आकार वाला। क्रोडः=सूअर। समासादितः=प्राप्त किया, पाया। कर्णान्ताकृष्टनिशितसायकेन=कान तक खींचे हुए तीक्ष्ण बाण से। समाहतः=चोट की, प्रहार किया, मारा। बालेन्दुद्युतिना=द्वितीया (दोज) के चन्द्र की सी कान्ति वाले से। दंष्ट्राग्रेण=दाढ़ की नोक से। पाटितोदरः=फाड़े गए पेट वाला।

गतासु =निर्जीव, मरा हुआ । व्यापाद्य=मार कर । शरप्रहारवेदनया=बाण के प्रहार की पीडा से । पञ्चत्वम्=मृत्यु को । आसन्नमृत्युः=समीप मृत्यु वाला, जल्दी मरने वाला, मुमूर्षु (मरासू) । वराहपुलिन्दौ=सूअर और बहेलिए को ।

हि० अनु०:—किसी वन्य प्रदेश मे कोई बहेलिया था । वह पाप की वृद्धि करने के लिए (शिकार के द्वारा पापार्जन करने के लिए) वन को गया । तब उसे घूमते हुए कज्जलगिरि के शिखर के समान आकार वाला (काला) एक बडा सूअर मिला । उसे देखकर उसने उसको कान तक खींचे हुए तीक्ष्ण बाण से मारा । उस (सूअर) ने भी क्रुद्ध चित्त के साथ दाढ की नोक से बहेलिए का पेट फाड दिया जिससे वह निर्जीव हो भूतल पर गिर पडा । इस प्रकार बहेलिए को मार कर सूअर भी बाण की चोट की पीडा से मृत्यु को प्राप्त हुआ । इसी बीच मे कोई ऐसा स्यार जिसकी मौत समीप ही थी, भूख से पीडित हो इधर-उधर घूमता हुआ उस स्थान पर आया । उसने ज्योंही सूअर और बहेलिया, दोनो को देखा त्योंही प्रसन्न हो सोचने लगा—'अरे ! विधाता मेरे ऊपर अनुकूल है । इसी से यह अचिन्तित (असभावित) भोजन उपस्थित हो गया है । क्यो न ऐसा हो, यह ठीक ही कहा जाता है—

अकृतेऽप्युद्यमे पुंसामन्यजन्मकृत फलम् ।
शुभाशुभ समभ्येति विधिना संनियोजितम् ॥८२॥

अन्वयः—उद्यमे अकृते अपि पुंसाम् अन्यजन्मकृतम् शुभाशुभम् फलम् विधिना सनियोजितम् समभ्येति ।

समास—अन्यजन्मकृतम्=अन्यानि जन्मानि (कर्मधा०), तेषु कृतम (तत्पु०) ।

व्या:—सनियोजितम्=सम्+नि+णिजन्त 'युज्' (योज्)+इट् (इ)+क्त (त) । समभ्येति='सम्+अभि' पूर्वक 'इण्' (इ) धातु, लट्, प्र० पु०, एक० ।

शब्दार्थः—सनियोजितम्=प्रेरित, दिया हुआ । समभ्येति=आता है, प्राप्त होता है ।

हि०अनु०:—(इस जन्म में) उद्योग न करने पर भी पुरुषों को अन्य जन्मों में उपार्जित शुभ एवं अशुभ फल विधाता के द्वारा प्रेरित होकर (------) प्राप्त होता है।

तथा च ॥

हि० अनु०:—और भी।

> यस्मिन् देशे च काले च वयसा यादृशेन च।
> कृतं शुभाशुभं कर्म तत्तया तेन भुज्यते ॥८३॥

अन्वय.—(सीधा व स्पष्ट है)।

हि० अनु०:—जिस देश में और जिस काल में तथा जैसी आयु के द्वारा शुभ और अशुभ कर्म किया जाता है, वह उस व्यक्ति के द्वारा वैसे ही भोगा जाता है।

तदहं तथा भक्षयामि यथा बहून्यहानि मे प्राणयात्रा भवति। तत्तावदेनं स्नायुपाशं धनुष्कोटिगतं भक्षयामि। उक्तं च—

हि० अनु०:—सो मैं इस प्रकार से खाऊँगा जिससे बहुत दिनों तक मेरी जीवनयात्रा चले। सो पहले धनुष की नोक में लगे हुए उस स्नायुपाश (तांत के जाल) को खाऊँ। कहा भी है—

> शनैः शनैश्च भोक्तव्यं स्वयं वित्तमुपार्जितम्।
> रसायनमिव प्राज्ञैर्हेलया न कदाचन ॥८४॥

अन्वयः—प्राज्ञैः स्वयम् उपार्जितम् वित्तम् रसायनम् इव शनैः शनैः भोक्तव्यम्, कदाचन हेलया न (भोक्तव्यम्)।

व्याः०—भोक्तव्यम्=भुज्+तव्य। प्राज्ञैः=प्रज्ञ+अण् (अ)।

शब्दार्थः—हेलया=एक दम, एक दम और जोर लगा कर। रसायनम्= पारा मिलाकर बनाई हुई उत्तम औषधि।

हि० अनु०:—बुद्धिमान् व्यक्तियों को स्वतः प्राप्त धन का रसायन के समान धीरे-धीरे उपयोग करना चाहिए, कभी एक दम (उपयोग) नहीं (करना चाहिए)।

इत्येवं मनसा निश्चित्य ~~चापूर्वभिनकोटि~~ मुखमध्ये प्रक्षिप्य स्नायुं भक्षितुं

प्रवृत्त.। ततश्च त्रुटिते पाशे तालुदेश विदार्य चापकोटिर्मस्तकमध्येन निष्क्रान्ता। सोऽपि तद्वेदनया तत्क्षणान्मृतः।

समासः—चापघटितकोटिम्=चापस्य घटिता कोटिः ताम् (तत्पु०)।

व्या.०—निश्चित्य=निस्+चि+तुक् (त)+क्त्वा (ल्यप्=य)। प्रक्षिप्य=प्र+क्षिप्+क्त्वा (ल्यप्=य)।

शब्दार्थ—चापघटितकोटिम्=धनुष् की (प्रत्यञ्चा से) बँधी हुई नोक को। प्रक्षिप्य=डाल कर। त्रुटिते=टूटने पर। विदार्य=फाडकर।

हि० अनु०.—ऐसा मन से निश्चय कर धनुष् की (प्रत्यञ्चा से) बँधी नोक को मुख के बीच मे डालकर स्नायु (तांत) खाने लगा। तब तांत के टूटने पर तालुप्रदेश (तालु के स्थान) को फाड कर धनुष् की नोक मस्तक के बीच मे से निकल गई।

अतोऽहं ब्रवीमि—'अतितृष्णा न कर्त्तव्या' इति। स पुनरप्याह—ब्राह्मणि, न श्रुतं भवत्या।

हि०अनु०:—इसलिए मैं कहता हूँ 'अधिक तृष्णा नही करनी चाहिए।' वह फिर भी बोला—'हे ब्राह्मणि' क्या आपने नही सुना ?

आयुः कर्म च वित्त च विद्या निधनमेव च।
पञ्चैतानि हि सृज्यन्ते गर्भस्थस्यैव देहिनः ॥८५॥

अन्वय.—आयु कर्म च वित्तम् च विद्या निधनम् एव च, एतानि पञ्च गर्भस्थस्य एव देहिन. सृज्यन्ते हि।

व्या०:—गर्भस्थस्य=गर्भ+स्था+क (अ)।

शब्दार्थः—निधनम्=मृत्यु।

हि० अनु०—आयु, कर्म, धन, विद्या और मृत्यु, ये पांच गर्भस्थित ही प्राणी के (विधाता के द्वारा) सृष्ट कर दिए जाते है।

अथैव सा तेन प्रबोधिता ब्राह्मण्याह—'यद्येव तदस्ति मे गृहे स्तोकस्तिलराशि। ततस्तिलांल्लुञ्चित्वा तिलचूर्णेन ब्राह्मणं भोजयिष्यामि इति। ततस्तद्वचन श्रुत्वा ब्राह्मणो ग्राम गत। सापि तिलानुष्णोदकेन समर्द्य कुट्टित्वा

सूर्यातपे दत्तवती । अत्रान्तरे तस्या गृहकर्मव्यग्रायास्तिलाना मध्ये कश्चित्सारमेयो मूत्रोत्सर्गं चकार । त दृष्ट्वा सा चिन्तितवती—'अहो, अहो नैपुण्य पश्य पराङ्-मुखीभूतस्य विधेः, यदेते तिला अभोज्याः कृताः । तदहमेतान् समादाय कस्यचिद् गृह गत्वा लुञ्चितैरलुञ्चितानानयामि । सर्वोऽपि जनोऽनेन विधिना प्रदास्यति' इति ।

समासः—तिलराशि.=तिलानां राशिः (तत्पु०) । उष्णोदकेन=उष्णम् च तद् उदकम् (कर्मधा०) । गृहकर्मव्यग्रायाः=गृहस्य कर्म (तत्पु०), तस्मिन् व्यग्रायाः (तत्पु०) । पराङ्मुखीभूतस्य=न पराङ्मुखः (नञ् तत्पु०), अपराङ्मुखः पराङ्मुखः भूतः (च्वितत्पु०) ।

व्या०:—प्रबोधिता=प्र+णिजन्त 'बुध्' (बोध्)+इट् (इ)+क्त (त)+टाप् (आ) । लुञ्चित्वा=लुञ्च्+इट् (इ)+क्त्वा । (त्वा) । संमर्द्य=सम्+मृद्+क्त्वा (ल्यप्=य) । दत्तवती=दा+क्तवतु (तवत्)+ङीप् (ई) ।

शब्दार्थः—प्रबोधिता=समझाई हुई । स्तोकः=थोडी । लुञ्चित्वा=छील कर, छिलका उतार कर । उष्णोदकेन=गर्म जल से । संमर्द्य=मीड कर । कुट्टित्वा=कूटकर । गृहकर्मव्यग्रायाः=घर के काम मे लगी हुई के । सारमेयः=कुत्ता । मूत्रोत्सर्गम्=मूत्र त्याग को । पराङ्मुखीभूतस्य=प्रतिकूल होने वाले का । लुञ्चितैः=छिले हुओं से । अलुञ्चितान्=बिना छिले हुओं को ।

हि० अनु०:—तब इस प्रकार उस (ब्राह्मण) के द्वारा समझाई हुई वह ब्राह्मणी बोली—'यदि ऐसा है तो मेरे घर मे तिलो की थोडी मात्रा है । सो तिलो को छीलकर तिल के चूर्ण (आटे) से ब्राह्मण को भोजन करा दूँगी । तब उसके वचन को सुनकर ब्राह्मण गांव को चला गया । उसने भी तिलो को गर्म जल से मीड़ कर, कूट कर सूर्य की धूप मे रख दिया । इस बीच में उस (ब्राह्मणी) के गृह-कार्य मे फँस जाने पर तिलो मे किसी कुत्ते ने मूत्र-त्याग कर दिया उसको देखकर वह सोचने लगी—अरे ! प्रतिकूल हो जाने वाले विधाता की कुशलता देखो कि ये तिल अभोज्य कर दिए । सो मैं इनको लेकर किसी के घर

जाकर छिले (तिलो) से बिना छिले (तिलो) को ले आऊँ। सभी लोग इस विधि से दे देंगे।

कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥१६०॥

अन्वयः—सन्तोषामृततृप्तानाम् शान्तचेतसाम् यत् सुखम्, तत् धनलुब्धानाम् इतः च इतः च धावताम् कुतः ।

समासः—सन्तोषामृततृप्तानाम्=सन्तोष एव अमृतम् (कर्मधा०) । तेन तृप्तानाम् (तत्पु०) । शान्तचेतसाम्=शान्तम् चेतः येषाम् तेषाम् (बहु०) । धनलुब्धानाम्=धनाय लुब्धानाम् (तत्पु०) ।

व्या०:—तृप्त=तृप्+क्त (त) । लुब्ध=लुभ्+क्त (त) । धावताम्=धाव्+शतृ (अत्) ।

हि० अनु०:—सन्तोषरूपी अमृत से तृप्त एवं शान्त चित्त वाले व्यक्तियों को जो सुख मिलता है, वह धन के लोभी और फलतः इधर-उधर दौड़-धूप करने वाले व्यक्तियों को कहाँ प्राप्त है ?

पीयूषमिव संतोषं पिबतां निर्वृतिः परा ।
दुःखं निरन्तरं पुंसामसंतोषवतां पुनः ॥१६१॥

अन्वयः—पीयूषम् इव संतोषम् पिबताम् परा निर्वृतिः (भवति) पुनः असन्तोषवताम् पुंसाम् निरन्तरम् दुःखम् (भवति) ।

व्या:०—निर्वृतिः=निर्+वृ+क्तिन् (ति) । असन्तोषवताम्=असन्तोष+मतुप् (मत्=वत्) ।

शब्दार्थः—निर्वृतिः=शान्ति, आनन्द । परा=परम, बड़ी ।

हि० अनु०—अमृत के समान संतोष का पान करने वाले पुरुषों को परम शान्ति प्राप्त होती है और असन्तोषी पुरुषों को निरन्तर दुःख प्राप्त होता है ।

निरोधाच्चेतसोऽक्षाणि निरुद्धान्यखिलान्यपि ।
आच्छादिते रवौ मेघैराच्छन्नाः स्युर्गभस्तयः ॥१६२॥

अन्वयः—चेतसः निरोधात् अखिलानि अपि अक्षाणि निरुद्धानि (भवन्ति), रवौ मेघैः आच्छादिते (सति) गभस्तयः आच्छन्नाः स्युः ।

व्या०:—निरोधात्=नि+रुध्+घञ (अ) । आच्छादिते=आ+छद (छाद्)+इ+क्त (त) । आच्छन्ना =आ+छद+क्त (त) ।

शब्दार्थ —निरोधात्=निरोध से, सयम स । अक्षाणि=इन्द्रियाँ । आच्छादिते=ढाँके जाने पर । गभस्तय =किरणें । आच्छन्ना =ढकी हुई ।

हि० अनु०—चित्त के निरोध (सयम) से सभी इन्द्रियाँ निरुद्ध (सयत) हो जाती हैं । सूय के मेघो के द्वारा ढाँके जाने पर सभी किरणें ढक जाती हैं ।

विशेष—यहाँ 'दृष्टान्त' अलकार है ।

> वाञ्छाविच्छेदन प्राहु स्वास्थ्य शान्ता महर्षय ।
> वाञ्छा निवर्तते नार्थैः पिपासेवाग्निसेवनै ।।१६३।।

अन्वय —शान्त महपय वाञ्छाविच्छेदनम् स्वास्थ्यम् प्राहु , वाञ्छा अग्निसेवनै पिपासा इव अर्थैः न निवतते ।

समास —वाञ्छाविच्छेदनम्=वाञ्छाया विच्छेदनम् (तत्पु०) ।

व्या० —विच्छेदनम्=वि+छिद्+ल्युट् (यु=अन) । स्वास्थ्यम्=स्वस्थ +ष्यञ (य) । सेवनै =सेव्+ल्युट् (यु=अन) ।

शब्दाथ —वाञ्छाविच्छेदनम्=अभिलाषा की निवृत्ति ।

हि० अनु० —शान्तचित्त महर्षि अभिलाषा की निवृत्ति को स्वास्थ्य या स्वस्थता कहते हैं कि तु अभिलाषा धन से उसी प्रकार निवृत्त नहीं हो सकती जिस प्रकार अग्नि के सेवन से प्यास निवृत्त नही हो सकती ।

> अनिन्द्यमपि निन्दन्ति स्तुवन्त्यस्तुत्यमुच्चकै ।
> स्वापतेयकृते मर्त्याः किं किं नाम न कुर्वते ।।१६४।।

अ वयः—मर्त्या अनिन्द्यम् अपि निन्दति, अस्तुत्यम् उच्चकै स्तुवन्ति, (ते) स्वापतेयकृते किम् किम् न कुर्वते नाम ।

समास —स्वापतेयकृते=स्वापतेयस्य कृते (तत्पु०) ।

व्या० —अनिन्द्यम्=नञ् (अ)+निन्द+ण्यत् (य) । अस्तुत्यम्=नञ (अ)+स्तु+तुक् (त)+क्यप् (य) स्वापतेय=स्वपति+ढञ् (एय) ।

शब्दार्थः—मर्त्याः=मनुष्य। अनिन्द्यम्=अनिन्दनीय को। अस्तुत्यम्=जो प्रशंसनीय न हो। स्वापतेयकृते=धन के लिए।

हि० अनु०:—मनुष्य अनिन्दनीय की निन्दा करते हैं, अप्रशंसनीय की प्रशंसा करते हैं, वे धन के लिए क्या-क्या नहीं करते हैं।

विशेषः—यहाँ 'नाम' शब्द का प्रयोग केवल वाक्यालंकार के लिए है, उसका कोई अर्थ नहीं।

धर्मार्थं यस्य वित्तेहा तस्यापि न शुभावहा।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥१६५॥

अन्वयः—यस्य वित्तेहा धर्मार्थम्, तस्य अपि (सा) शुभावहा न, हि पंकस्य प्रक्षालनात् दूरात् अस्पर्शनम् वरम्।

समासः—धर्मार्थम्=धर्माय इदम् (नित्य तत्पु०)। वित्तेहा=वित्तस्य वित्ताय वा ईहा। शुभावहा=शुभम् आवहति (उपपदतत्पु०)।

व्या०:—शुभावहा=शुभ+आ+वह्+अच् (अ)। प्रक्षालनात्=प्र+क्षल (क्षाल्)+ल्युट् (यु=अन)। अस्पर्शनम्=नञ्+स्पृश्+ल्युट् (यु=अन)।

शब्दार्थः—वित्तेहा=धन के लिए चेष्टा, प्रयत्न या इच्छा। शुभावहा=भला करने वाली। पङ्कस्य=कीचड के।

हि० अनु०:—जिसकी धनाभिलाषा धर्म करने के लिए है, उसका भी वह कोई भला करने वाली नहीं है, क्योंकि कीचड (को लगाकर उस) के धोने की अपेक्षा यह अच्छा है कि उससे दूर रहकर उसका स्पर्श ही न किया जावे।

विशेषः—यहाँ 'अर्थान्तरन्यास' अलंकार है।

दानेन तुल्यो निधिरस्ति नान्यः,
लोभाच्च नान्योऽस्ति रिपुः पृथिव्याम्।
विभूषणं शीलसमं न चान्यत्
संतोषतुल्यं धनमस्ति नान्यत् ॥१६६॥

अन्वय—दानेन तुल्यः अन्यः निधिः न अस्ति, लोभात् अन्यः च पृथिव्याम्

रिपुः न अस्ति, शीलसमम् अन्यद् विभूषणम् न (अस्ति), संतोषतुल्यम् अन्यद् धनम् न अस्ति।

समास—शीलसमम्=शीलेन समम् (तत्पु०)। संतोषतुल्यम्=संतोषेण तुल्यम् (तत्पु०)।

व्या०:—निधिः=नि+धा+कि (इ)।

शब्दार्थः—निधिः=संचित धनराशि, खजाना।

हि० अनु०:—दान के समान दूसरा खजाना नहीं है, लोभ के समान दूसरा पृथिवी में शत्रु नहीं है। शील (चरित्र, सदाचरण) के समान दूसरा आभूषण नहीं है, संतोष के समान दूसरा धन नहीं है।

दारिद्र्यस्य परा मूर्तिर्यन्मानद्रविणाल्पता।
जरद्गवधनः शर्वस्तथापि परमेश्वरः ॥१६७॥

अन्वयः—यत् मानद्रविणाल्पता (तत्) दारिद्र्यस्य परा मूर्तिः शर्वः जरद्गवधनः तथापि (सः) परमेश्वर।

समासः—मानद्रविणाल्पता=मानम् एव द्रविणम् (कर्मधा०), तस्य अल्पता (तत्पु०)। जरद्गवधनः=जरन् गौः धनम् यस्य सः (बहु०)। परमेश्वरः=परमश्चासौ ईश्वरः (कर्मधा०)।

व्या०:—दारिद्र्यस्य=दरिद्र+ष्यञ् (य)।

शब्दार्थ—परा=सर्वोच्च, अन्तिम। मूर्तिः=स्वरूप। मानद्रविणाल्पता=समान रूपी धन की कमी। जरद्गवधनः=जिसका धन बूढ़ा बैल है।

हि० अनु०:—जो कि समान रूपी धन की कमी है वही दरिद्रता का सर्वोच्च स्वरूप (अन्तिम पराकाष्ठा) है, यद्यपि शिवजी का धन केवल एक बूढ़ा बैल (नांदिया) है, तो भी वह परमेश्वर है (तात्पर्य यह है कि सबसे बड़ा दरिद्र वह है जिसके पास समान रूपी धन की कमी है, भौतिक धन की कमी से मनुष्य दरिद्र नहीं होता)।

सकृत्कन्दुकपातेन पतत्यार्यः पतन्नपि।
तथा पतति मूर्खस्तु मृत्पिण्डपतनं यथा ॥१६८॥

अन्वयः— आर्यः सकृत् पतन् अपि कन्दुकपातेन पतति, मूर्खः तु तथा पतति यथा मृत्पिण्डपतनम् ।

समासः—कन्दुकपातेन=कन्दुकस्य पातः तेन (तत्पु०) । मृत्पिण्डपतनम्= मृदः पिण्डः (तत्पु०), तस्य, पतनम् (तत्पु०) ।

व्या०:—पतन्=पत्+शतृ (अत्) । पात=पत्+घञ् (अ) । पतनम्= पत्+ल्युट् (यु=अन) ।

शब्दार्थः—आर्यः=श्रेष्ठ पुरुष, बुद्धिमान् । सकृत्=एक बार । कन्दुकपातेन=गेंद की गिरन से अर्थात् गेंद के गिरने के समान । मृत्पिण्डपतनम्= मिट्टी के लोदे का गिरना ।

हि० अनु०:—बुद्धिमान् पुरुष एक बार गिरता हुआ भी गेंद के गिरने के समान गिरता है अर्थात् गेंद की तरह एक बार गिरकर फिर उछल जाता है, किन्तु मूर्ख तो ऐसे गिरता है जैसे मिट्टी के लौदे का गिरना अर्थात् मिट्टी के लोदे की तरह पडा का पडा ही रह जाता है ।

एवं ज्ञात्वा भद्र, त्वया सतोषः कार्यः, इति । मन्थरकवचनमाकर्ण्य वायस आह—'मन्थरको यदेवं वदति तत्त्वया चित्ते कर्तव्यम् । अथवा साध्विदमुच्यते—

हि० अनु०:—ऐसा जानकर भाई, तुम्हे संतोप करना चाहिए । मन्थरक के वचन को सुनकर कौआ बोला—'मन्थरक जो ऐसा कहता है सो तुम्हे यह चित्त मे रखना चाहिए । अथवा यह ठीक कहा जाता है—

सुलभाः पुरुषा राजन् सततं प्रियवादिनः ।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥१६६॥

अन्वयः—राजन् सततम् प्रियवादिनः पुरुषाः सुलभाः, अप्रियस्य पथ्यस्य च वक्ता श्रोता च दुर्लभः ।

समासः—प्रियवादिनः=प्रियम् वदन्ति (उपपद तत्पु०) ।

व्या०:—प्रियवादिनः=प्रिय+वद्+णिनि (इन्) । वक्ता=ब्रू (वच्)+तृच् (तृ) । श्रोता=श्रु+तृच् (तृ) ।

हि० अनु०:—हे राजन्, निरन्तर प्रिय बोलने वाले पुरुष सुलभ हैं, किन्तु अप्रिय और हितकर बात का कहने वाला और सुनने वाला दुर्लभ है।

अप्रियाण्यपि पथ्यानि ये वदन्ति नृणामिह।
त एव सुहृदः प्रोक्ता अन्ये स्युर्नामधारकाः ॥१७०॥

अन्वय.—इह ये नृणाम् अप्रियाणि पथ्यानि वदन्ति, ते एव सुहृदः प्रोक्ताः अन्ये नामधारकाः स्युः।

समास.—नामधारकाः=नाम्नः धारकाः (तत्पु०)।

व्या०:—प्रोक्ताः=प्र+ब्रू (वच्)+क्त (त)। नामधारका=नाम+धृ+ण्वुल् (वु=अक)।

हि० अनु०:—इस जगत् में जो मनुष्यों से अप्रिय होने पर भी हितकर वचन कहते हैं, वे ही सुहृद् कहे गए हैं, अन्य तो केवल (सुहृद् का) नाम धारण करने वाले हैं (सुहृद् नहीं)।

अथैवं जल्पतां तेषां चित्राङ्गो नाम हरिणो लुब्धकत्रासितस्तस्मिन्नेव सरसि प्रविष्टः। अथायान्तं ससम्भ्रममवलोक्य लघुपतनको वृक्षमारूढः। हिरण्यको निकटवर्तिनं शरस्तम्बं प्रविष्टः। मन्थरकः सलिलाशयमास्थितः। अथ लघुपतनको मृगं सम्यक् परिज्ञाय मन्थरकमुवाच—'एह्येहि सखे मन्थरक, मृगोऽयं तृषार्तोऽत्र समायातः सरसि प्रविष्टः, तस्य शब्दोऽयं न मानुषसम्भवः' इति। तच्छ्रुत्वा मन्थरको देशकालोचितमाह—'भो लघुपतनक, यथायं मृगो दृश्यते प्रभूतमुच्छ्वासमुद्वहन्नुद्भ्रान्तदृष्ट्या पृष्ठतोऽवलोकयति, तन्न तृषार्त एषः, नूनं लुब्धकत्रासितः। तज्ज्ञायतामस्य पृष्ठे लुब्धका आगच्छन्ति न वा' इति। उक्तं च—

समास.—लुब्धकत्रासितः=लुब्धकेन त्रासितः (तत्पु०)। शरस्तम्बम्=शराणाम् स्तम्बम् (तत्पु०)। मानुषसम्भवः=मानुषात् सम्भवः यस्य सः (बहु०)।

व्या०:—जल्पताम्=जल्प्+शतृ (अत्)। त्रासित=णिजन्त 'त्रस्' (त्रास्)+इट् (इ)+क्त (त)। आयान्तम्=आ+या+शतृ (अत्)। आरूढः=आ+रुह्+क्त (त)। आस्थितः=आ+स्था+इट् (इ)+क्त (त)। परिज्ञाय=परि+ज्ञा+क्त्वा (ल्यप्=य) उद्वहन्=उत्+वह्+शतृ(अत्)। उद्भ्रान्त=उत्+भ्रम्+क्त (त)।

शब्दार्थ.—जल्पताम्=बातें करने वालों का। लुब्धकत्रासित:=बहेलियों के द्वारा डराया हुआ। ससंभ्रमम्=हड़बड़ाहट के साथ। शरस्तम्बम्=एक प्रकार की घास का ढेर। प्रभूतम्=बहुत। उच्छ्वासम्=साँस। उद्भ्रान्त-दृष्ट्या=घबड़ाई हुई नजर से।

हि० अनु:०—इसके बाद इस प्रकार उनसे बातें करते हुए चित्राङ्ग नामक हरिण बहेलियों के द्वारा डराया जाकर उसी तालाब में घुसा। आते हुए को हड़बड़ाहट के साथ देखकर लघुपतनक पेड़ पर बैठ गया। हिरण्यक घास में पड़े हुए घास के ढेर में घुस गया। मन्थरक तालाब में जम गया। तब लघुपतनक हरिण को अच्छी तरह पहचान कर मन्थरक से बोला—'मित्र मन्थरक, आओ-आओ। यह प्यासा मृग यहाँ आकर तालाब में घुस गया है, यह उसका शब्द है, किसी मनुष्य का शब्द नहीं है।' यह सुनकर मन्थरक ने देश और और काल के अनुकूल कहा—'हे लघुपतनक, जैसा कि यह मृग दिखाई देता है कि यह बहुत सी साँसों को लेता हुआ घबड़ाई हुई नजर से पीछे को देखता है, सो यह प्यासा नहीं है, यह निश्चय ही बहेलियों का डराया हुआ है। सो जानो, इसके पीछे बहेलिए आ रहे हैं या नहीं। कहा भी है—

भयत्रस्तो नरः श्वासं प्रभूतं कुरुते मुहुः।
दिशोऽवलोकयत्येव न स्वास्थ्यं व्रजति क्वचित् ॥१७१॥

अन्वयः—भयत्रस्तः नरः मुहुः प्रभूतम् श्वासम् कुरुते, दिशः एव अवलोकयति, क्वचित् स्वास्थ्यम् न व्रजति।

समासः—भयत्रस्तः=भयेन भयाद् वा त्रस्तः (तत्पु०)।

व्या०:—त्रस्तः=त्रस्+क्त (त)। श्वासम्=श्वस्+घञ् (अ)।

शब्दार्थः—दिशः=दिशाएँ, इधर-उधर। स्वास्थ्यम्=शान्ति, निश्चिन्तता।

हि० अनु० —भयभीत व्यक्ति बारम्बार बहुत साँस लेता है। वह इधर-उधर ही देखता है और कहीं शान्ति प्राप्त नहीं करता है।

तच्छ्रुत्वा चित्राङ्ग आह—'भो मन्थरक, ज्ञात त्वया सम्यङ्मे त्रासकारणम्। अहं लुब्धकशरप्रहारादुद्गारितः कृच्छ्रेणात्र समायातः। मम यूथं तैर्लुब्धकैर्व्या-

पातितं भविष्यति । तच्छरणागतस्य मे दर्शय किंचिदगम्यं स्थानं लुब्धकानाम् ।' तदाकर्ण्य मन्थरक आह—'भोश्चित्राङ्ग, श्रूयतां नीतिशास्त्रम्—

समासः—त्रासकारणम्=त्रासस्य कारणम् (तत्पु०)। लुब्धकशरप्रहारात्=लुब्धकानाम् शराः (तत्पु०), तेषाम् प्रहारात् (तत्पु०)। शरणागतस्य=शरणम् आगतस्य (तत्पु०)।

व्या०—श्रुत्वा=श्रु+क्त्वा (त्वा)। ज्ञातम्=ज्ञा+क्त (त)। त्रास=त्रस्+घञ् (अ)। उद्धारित=उत्=णिजन्त 'हृ' (हार्)+इट् (इ)+क्त (त)। समायात=सम्+आ+या+क्त (त)। व्यापादितम्=वि+आ+णिजन्त 'पद्' (पाद्)+इट् (इ)+क्त (त)। अगम्यम्=नञ् (अ)+गम्+यत् (य)। आकर्ण्य=आ+कर्ण्+क्त्वा (ल्यप्=य)।

शब्दार्थः—सम्यक्=अच्छी तरह। त्रासकारणम्=भय का कारण। लुब्धकशरप्रहारात्=बहेलियों के बाणों के प्रहार से। उद्धारितः=बचा हुआ। कृच्छ्रेण=मुश्किल से। यूथम्=झुण्ड। व्यापादितम्=मारा हुआ। अगम्यम्=जहाँ न पहुँचा जा सके। आकर्ण्य=सुन कर।

हि० अनु०:—यह सुनकर चित्राङ्ग बोला—'हे मन्थरक, तुमने मेरे भय का कारण ठीक तरह जान लिया है। मैं बहेलियों के बाणों के प्रहार से बच कर बड़ी मुश्किल से यहाँ आया हूँ। मेरा झुण्ड उन बहेलियों ने मार डाला होगा। सो मुझ शरणागत को कोई ऐसा स्थान दिखाओ जो बहेलियों की पहुँच से बाहर हो। यह सुनकर मन्थरक बोला—'हे चित्राङ्ग, नीतिशास्त्र सुनो—

द्वावुपायाविह प्रोक्तौ विमुक्तौ शत्रुदर्शने।
हस्तयोश्चालनादेको द्वितीयः पादवेगजः ॥१७२॥

अन्वय—इह शत्रुदर्शने विमुक्तौ द्वौ उपायौ प्रोक्तौ, एकः हस्तयोः चालनात् द्वितीयः पादवेगजः।

समासः—शत्रुदर्शने=शत्रूणाम् दर्शने (तत्पु०)। पादवेगजः=पादयोः वेगः (तत्पु०), तस्माज्जायते (उपपद तत्पु०)।

व्या०:—दर्शने=दृश्+ल्युट् (यु=अन)। चालनात्=णिजन्त 'चल्'

(चाल्)+ल्युट् (यु=अन) । पादवेगजः=पादवेग+जन्+ड (अ)। विमुक्तौ=वि+मुच्+क्तिन् (ति), सप्तमी एक०।

शब्दार्थः—विमुक्तौ=छुटकारे के विषय मे अर्थात् छुटकारे के लिए। पादवेगज=पैरो के वेग से होने वाला।

हि० अनु०—यहां शत्रुओ का दर्शन होने पर उनसे छुटकारे के लिए दो उपाय कहे गए हैं, एक तो हाथो के चलाने से होने वाला और दूसरा पैरो के वेग से होने वाला।

तद्गम्यता शीघ्र सघन वनम्, यावदद्यापि नागाच्छन्ति ते दुरात्मानो लुब्धका।' अत्रान्तरे लघुपतनक. सत्वरमभ्युपेत्योवाच—'भो मन्थरक, गतास्ते लुब्धकाः स्वगृहोन्मुखाः प्रचुरमासपिण्डधारिण। तन्चित्राङ्ग, त्व विश्रब्धो वनाद् वहिर्भव।' ततस्ते चत्वारोऽपि मित्रभावमाश्रितास्तस्मिन् सरसि मध्याह्नसमये वृक्षच्छायाया अधस्तात् सुभाषितगोष्ठीसुखमनुभवन्त सुखेन काल नयन्ति। अथवा युक्तमेतदुच्यते—

समास—दुरात्मानः=दुष्ट आत्मा येषाम् ते (बहु०)। स्वगृहोन्मुखा=स्वगृह प्रति स्वगृहाय वा उन्मुखा (तत्पु०)। प्रचुरमांसपिण्डधारिणः=प्रचुरम् तत् मासम् (कर्मधा०), तस्य पिण्डा (तत्पु०)। तान् धरन्ति (उपपद तत्पु०)। मित्रभावम्=मित्रस्य भावः तम् (तत्पु०)। मध्याह्नसमये=मध्याह्नस्य समये (तत्पु०)। वृक्षच्छायाया—वृक्षाणाम् छाया तस्या (तत्पु०)। सुभाषितगोष्ठीसुखम्=सुभाषितानाम् गोष्ठ्यः (तत्पु०), तासाम् सुखम् (तत्पु०)।

व्या०:—अभ्युपेत्य=अभि+उप+इ+तुक् (त्)+क्त्वा (ल्यप्=य)। प्रचुरमासपिण्डधारिण=प्रचुरमासपिण्ड+धृ+णिनि (इन्)। विश्रब्धः=वि+श्रम्भ्+क्त (त)। आश्रिताः=आ+श्रि+क्त (त)। अनुभवन्तः=अनु=भू+शतृ (अत्)।

शब्दार्थ—दुरात्मानः=दुष्ट। सत्वरम्=शीघ्र। अभ्युपेत्य=पास जाकर। स्वगृहोन्मुखा.=अपने घरो की ओर मुख करके। प्रचुरमासपिण्डधारिणः=अत्यधिक मास के पिण्डो को रखे हुए। विश्रब्धः=निश्चिन्त। अधस्तात्=नीचे। सुभाषितगोष्ठीसुखम्=अच्छी बातो के लिए की गई

बैठकों के सुख को । अनुभवन्तः=अनुभव करते हुए । नयन्ति=व्यतीत करते हैं (वे) ।

हि० अनु०:—सो शीघ्र सघन वन में चले जाओ, जब तक कि अभी वे दुष्ट बहेलिए न आवें । इस बीच में लघुपतनक शीघ्र पास पहुँच कर बोला—'हे मन्थरक, वे बहेलिए भरपूर मांस के पिण्डों को लादे हुए अपने घरों की ओर चले गए । सो चित्राङ्ग., तुम निश्चिन्त होकर वन से बाहर रहो । तब वे चारों मित्रता के साथ उस तालाब पर दोपहर के समय पेड़ों की छाया के नीचे अच्छी बातों के लिए की गई बैठकों के सुख का अनुभव करते हुए सुखपूर्वक समय को व्यतीत करते थे । क्यों न ऐसा हो, यह ठीक ही कहा जाता है—

सुभाषितरसास्वादबद्धरोमाञ्चकञ्चुकाः ।
विनापि सगमं स्त्रीणां सुधियः सुखमासते ।।१७३।।

अन्वयः—सुभाषितरसास्वादबद्धरोमाञ्चकञ्चुकाः सुधियः स्त्रीणाम् सगमम् विना अपि सुखम् आसते ।

समासः—सुभाषितरसास्वादबद्धरोमाञ्चकञ्चुकाः = सुभाषितानाम् रसः (तत्पु०), तस्य आस्वादः (तत्पु०), तेन बद्धाः (तत्पु०), रोमाञ्चा एव कञ्चुकाः (कर्मधा०), सुभाषितरसास्वादबद्धाः रोमाञ्चकञ्चुकाः येषाम् ते (बहु०) ।

व्या:०—सुभाषित=सु+भाष्+इट् (इ)+क्त (त) । आस्वाद=आ+स्वद्+घञ् (अ) । बद्ध=बन्ध्+क्त (त) ।

शब्दार्थ.—सुभाषितरसास्वादबद्धरोमाञ्चकञ्चुकाः=सुभाषितों के रस के आस्वादन से बँध गए हैं रोमाञ्च रूपी कञ्चुक (चोली) जिनके ऐसे । सुधियः=विद्वान्, बुद्धिमान् । आसते=रहते हैं ।

हि० अनु०:—जिनके सुभाषितों के रस के आस्वादन से रोमाञ्च रूपी कञ्चुक बँधे हुए हैं ऐसे बुद्धिमान् व्यक्ति स्त्रियों के समागम के बिना भी सुखपूर्वक रहते हैं ।

सुभाषितमयद्रव्यसंग्रहं न करोति यः ।
स तु प्रस्तावयज्ञेषु कां प्रदास्यति दक्षिणाम् ।।१७४।।

अन्वय —य सुभाषितमयद्रव्यसग्रहम् न करोति स तु प्रस्तावयज्ञेषु काम् दक्षिणाम् प्रदास्यति ।

समास —सुभाषितमयद्रव्यसग्रहम्=प्रकृतम् सुभाषितम् सुभाषितमयम् (तद्धित) तच्च तद् द्रव्यम् (कर्मधा०), तस्य सग्रहम् (तत्पु०), प्रस्तावयज्ञेषु= प्रस्तावा एव यज्ञा तेषु (कर्मधा०) ।

व्या —सुभाषितमय=सुभाषित+मयट् (मय)। प्रस्ताव=प्र+स्तु+ घञ् (अ) ।

शब्दार्थ—सुभाषितमयद्रव्यसग्रहम्=प्रचुर (भरपूर) सुभाषित रूप द्रव्य के सग्रह को । प्रस्तावयज्ञेषु=वार्त्तालाप रूपी यज्ञो मे ।

हि० अनु० —जो प्रचुर सुभाषित रूप धन का सग्रह नही करता, वह वार्त्तालाप रूपी यज्ञो मे क्या दक्षिणा देगा अर्थात् जो सुभाषितो को अत्यधिक मात्रा में कण्ठस्थ नही कर लेता वह वार्त्तालाप के अवसर पर अपनी बात की पुष्टि मे क्या कह सकेगा ।

तथा च ।

हि० अनु० —और भी !

सकृदुक्त न गृह्णाति स्वय वा न करोति य ।
यस्य संपुटिका नास्ति कुतस्तस्य सुभाषितम् ॥१७५॥

अन्वय —य सकृद् उक्तम् न गृह्णाति, स्वयम् वा न करोति, यस्य सपुटिका न अस्ति, तस्य सुभाषितम् कुत ।

शब्दार्थ —सपुटिका=पन्नो, रत्नो की पेटी ।

हि० अनु० —जो (दूसरे के द्वारा) एक बार कहे हुए को ग्रहण नही कर लेता है (याद नही कर लता है) अथवा जो स्वय सुभाषितो को नही बनाता है, इस प्रकार जिसके पास (सुभाषित रूपी रत्न रखने की) पेटी नही है, उसके पास सुभाषित कहाँ हो सकते है ।

अथैकस्मिन्नहनि गोष्ठीसमये चित्राङ्गो नायात । अथ ते व्याकुलीभूता परस्पर जल्पितुमारब्धा — अहो किमद्य सुहृन्न समायात । किं सिंहादिभि-

क्वापि व्यापादितः, उत लुब्धकैः, अथवा अनले प्रपतितो गर्ताविषमे वा नवतृण-लोल्यात्' इति । अथवा साध्विदमुच्यते—

समास—गर्ताविषमे=गर्तामि विषमे (तत्पु०)।

व्या०—आयात=आ+या+क्त (त)। व्याकुलीभूता=व्याकुल+च्वि (×)+भूता। जल्पितुम्=जल्प+इट् (इ)+तुमुन् (तुम्)। आरब्धा=आ+रभ्+क्त (त)। व्यापादित=वि+आ+णिजन्त 'पद' (पाद)+इट् (इ)+क्त (त)। प्रपतित=प्र+पत्+इट+(इ)+क्त (त)। लोल्यात्=लोल+ष्यञ् (य)।

शब्दार्थ—व्यापादित=मार डाला। गर्ताविषमे=गड्ढा या गुफाओं में ऊबड़ खाबड़ स्थान में। नवतृणलोल्यात्=नई घास के लालच से। प्रपतित=गिर पड़ा।

हि० अनु०—इसके बाद एक दिन गोष्ठी (बैठक) के समय चित्राङ्ग नहीं आया। तब वे व्याकुल होकर परस्पर कहने लगे—'अरे, आज मित्र क्यों नहीं आया। क्या कहीं सिंह आदि ने मार डाला या शिकारियों ने मार डाला अथवा आग में गिर पड़ा या नई घास के लालच से गड्ढा या गुफाओं में ऊबड़-खाबड़ स्थान में गिर गया'। अथवा यह ठीक कहा जाता है—

स्वगृहोद्यानगतेऽपि स्निग्धैः पापं विशङ्क्यते मोहात्।
किमु दृष्टबह्वपायप्रतिभयकान्तारमध्यस्थे ॥१७६॥

स्निग्धैः=स्नेही व्यक्तियो क द्वारा। पापम्=अनिष्ट। दृष्टबह्वपायप्रतिभय कान्तारमध्यस्थे=जिसमे बहुत से सकटो से उत्पन्न भय का अनुभव किया जा चुका है, ऐसे बियावान जगल के मध्य मे स्थित के विषय मे। किमु=क्या, क्या कहना।

हि० अ०—अपने घर के बगीचे मे गए हुए व्यक्ति के विषय मे भी स्नेही जन मोहवश अनिष्ट की आशका करते हैं तो फिर जिसमे बहुत से सकटो से उत्पन्न भय का अनुभव किया जा चुका है, ऐसे बियावान जगल के मध्य मे स्थित व्यक्ति के विषय मे क्या कहना ! (वहाँ तो और भी अधिक अनिष्ट की आशका की जाती है)।

अथ मन्थरको वायसमाह—भो लघुपतनक, अह हिरण्यकश्च तावद् द्वावप्यशक्तौ तस्यान्वेषण कर्तुं मन्दगतित्वात्। तद्गत्वा त्वमरण्य शोधय यदि कुत्रचित्त जीवन्त पश्यसि' इति। तदाकर्ण्य लघुपतनको नातिदूरे यावद्गच्छति तावत् पल्वलतीरे चित्राङ्ग कूटपाशनियन्त्रितस्तिष्ठति। त दृष्ट्वा शोक व्याकुलितमनास्तमवोचत—'भद्र, किमिदम्।' चित्राङ्गोऽपि वायसमवलोक्य विशेषेण दु खितमना बभूव। अथवा युक्तमेतत्।

समास—मन्दगतित्वात्=मन्दा गति ययो तौ (बहु०), तयो भाव (तद्धित)। पल्वलतीरे=पल्वलस्य तीरे (तत्पु०)। कूटपाशनियन्त्रित =कूटश्च असौ पाश (कर्मधा०)। तेन नियन्त्रित (तत्पु०)। शोकव्याकुलितमना =शोकेन व्याकुलितम् मन यस्य स (बहु०)। दु खितमना =दु खितम् मन यस्य स (बहु०)।

व्या०—अशक्तौ=नञ् (अ)+शक्+क्त (त)। अन्वेषणम्=अनु+इष्+ल्युट् (यु=अन)। जीवन्तम्=जीव्+शतृ (अत)। नियन्त्रित =नि+यन्त्+इट् (इ)+क्त (त)।

शब्दार्थ—अशक्तौ=असमर्थ। मन्दगतित्वात्=धीमी चाल वाले होने के कारण। शोधय=खोजो। कूटपाशनियन्त्रित =जाल से बँधा हुआ।

हि० अनु०—तब मन्थरक कौए से बोला—'हे लघुपतनक, मैं और हिरण्यक तो दोनो धीमी चाल वाले होने के कारण उसकी खोज करने मे अस-

व्या०—अत्यये=अति+इ+अच् (अ)। समुत्पन्ने=सम्+उत्+पद्+क्त (त)।

शब्दार्थ —प्राणात्यये=प्राणों के नाश के।

हि० अनु०:—यदि प्राणो के नाश (मृत्यु) के उपस्थित होने पर मित्रों का दर्शन हो जाता है तो उनके बाद वह जीवे या मरे, दोनो ही दशाओ म उसके लिए सुखद रहता है (अथवा मर जाने वाले और जीवित रहने वाले, दोनों के लिए सुखद रहता है)।

तत्क्षन्तव्य यन्मया प्रणयात् सुभाषितगोष्ठीष्वभिहितम्। तथा हिरण्यक-मन्थरकौ मम वाक्याद् वाच्यौ—

हि० अनु०:—सो वह सब क्षमा करना जो कुछ मैंने सुभाषितो की गोष्ठियो मे प्रेम के कारण कहा हो, और मेरी ओर से हिरण्यक और मन्थरक से यह कहना कि—

अज्ञानाज्ज्ञानतो वापि दुरुक्तं यदुदाहृतम्।
तत्क्षन्तव्यं युवाभ्यां मे कृत्वा प्रीतिपरं मनः ॥१७६॥

अन्वय —अज्ञानात् ज्ञानतः वा अपि यत् दुरुक्तम् उदाहृतम्, तत् युवाभ्याम् मे प्रीतिपरम् मनः कृत्वा क्षन्तव्यम्।

समासः—दुरुक्तम्=दुष्टम् उक्तम् (गति तत्पु०)। प्रीतिपरम्=प्रीत्याम् परम् (तत्पु०)।

व्या०:—दुरुक्तम्=दुर्+ब्रू (वच्)+क्त (त)। उदाहृतम्=उत्+आ+हृ+क्त (त)। क्षन्तव्यम्=क्षम्+तव्य।

शब्दार्थ.—दुरुक्तम्=खराब बात, न कहने योग्य बात।

हि० अनु०—अज्ञान से अथवा ज्ञान से भी जो कुछ खराब वचन मैंने कहा हो, उसे तुम दोनो मेरे प्रति प्रीतिपूर्ण चित्त करके क्षमा करें।

तच्छ्रुत्वा लघुपतनक आह—'भद्र, न भेतव्यमस्मद्विधैर्विद्यमानैः। यावदहं द्रुततरं हिरण्यकं गृहीत्वागच्छामि। अपरं ये सत्पुरुषा भवन्ति ते व्यसने न व्याकुलत्वमुपयान्ति। उक्तं च—

मय हैं। सो तुम जाकर वन मे खोज करो कदाचित् उसे तुम जिन्दा देख सको। यह सुनकर लघुपतनक जैसे ही थोडी दूर पर जाता है, वैसे ही एक छोटे तालाब के किनारे चित्राङ्ग को जाल से बंधा हुआ देखता है। उसे देखकर शोक से आकुल चित्त वाला हो वह उससे बोला—'भाई, यह क्या ? चित्राङ्ग भी कौए को देख कर और भी अधिक दु खी हुआ। क्यो न ऐसा हो यह ठीक है।

अपि मन्दत्वमापन्नो नष्टो वापीष्टदर्शनात्।
प्रायेण प्राणिना भूयो दु खावेगोऽधिको भवेत् ॥१७७॥

अन्वय —म दत्वम् आपन्न अपि नष्ट वा अपि प्राणिनाम् दु खावेग इष्टदर्शनात् भूय प्रायेण अधिक भवेत्।

समास —दु खावेग =दु खस्य आवेग (तत्पु०)। इष्टदशनात्—इष्टानाम् दशनम् तस्मात् (तत्पु०)।

व्या० —आपन्न =आ+पद+क्त (त)।

शब्दार्थ —इष्टदर्शनाद्=प्रियजनो के दशन से। भूय =फिर।

हि० अनु० —धीमा पडा हुआ भी अथवा बिल्कुल नष्ट हुआ भी प्राणियो के दु ख का आवेग प्रियजनो के दर्शन से फिर प्राय अधिक हो जाता है।

ततश्च बाष्पावसाने चित्राङ्गो लघुपतनकमाह—भो मित्र सजातोऽय तावन्मम मृत्यु । तद्युक्त सपन्न यद्भवता सह मे दशन सजातम्। उक्त च—

हि० अनु० —तब रोने के बाद चित्राङ्ग लघुपतनक से बोला—'हे मित्र यह तो मेरी मृत्यु हो गई। सो यह ठीक हुआ कि आपके साथ मेरी मुलाकात हो गई। कहा भी है—

प्राणात्यये समुत्पन्ने यदि स्यान्मित्रदर्शनम्।
तदद्वाभ्या सुखद पश्चाज्जीवतो ऽपि मृतस्य च ॥१७८॥

अन्वय —यदि प्राणात्यये समुत्पन्ने मित्रदशनम् स्यात् तत् पश्चात् जीवत अपि मृतस्य च द्वाभ्याम् सुखदम्।

समास —प्राणात्यये=प्राणानाम् अत्यय तस्मिन् (तत्पु०)। मित्रदशनम्=मित्राणाम् दशनम् (तत्पु०)। सुखदम्=सुखम ददाति (उपपद तत्पु०)।

व्या० —अत्यये=अति+इ+अच् (अ)। समुत्पन्ने=सम्+उत्+पद्+क्त (त)।

शब्दार्थ —प्राणात्यये=प्राणो के नाश के।

हि० अनु०—यदि प्राणो के नाश (मृत्यु) के उपस्थित होने पर मित्रो का दर्शन हो जाता है तो उसके बाद वह जीवे या मरे, दोनो ही दशाओं मे उसके लिए सुखद रहता है (अथवा मर जाने वाले और जीवित रहने वाले, दोनो के लिए सुखद रहता है)।

तत्क्षन्तव्य यन्मया प्रणयात् सुभाषितगोष्ठीष्वभिहितम्। तथा हिरण्यक-मन्थरकौ मम वाक्याद् वाच्यौ—

हि० अनु०:—सो वह सब क्षमा करना जो कुछ मैंने सुभाषितो की गोष्ठियो मे प्रेम के कारण कहा हो, और मेरी ओर से हिरण्यक और मन्थरक से यह कहना कि—

अज्ञानाज्ज्ञानतो वापि दुरुक्त यदुदाहृतम्।
तत्क्षन्तव्य युवाभ्यां मे कृत्वा प्रीतिपर मन ॥१७६॥

अन्वय —अज्ञानात् ज्ञानत वा अपि यत् दुरुक्तम् उदाहृतम्, तत् युवाभ्याम् मे प्रीतिपरम् मन कृत्वा क्षन्तव्यम्।

समासः—दुरुक्तम्=दुष्टम् उक्तम् (गति तत्पु०)। प्रीतिपरम्=प्रीत्याम् परम् (तत्पु०)।

व्या० —दुरुक्तम्=दुर्+ब्रू (वच्)+क्त (त)। उदाहृतम्=उत्+आ+हृ+क्त (त)। क्षन्तव्यम्=क्षम्+तव्य।

शब्दार्थ —दुरुक्तम्=खराब बात, न कहने योग्य बात।

हि० अनु० —अज्ञान से अथवा ज्ञान से भी जो कुछ खराब वचन मैंने कहा हो, उसे तुम दोनो मेरे प्रति प्रीतिपूर्ण चित्त करके क्षमा करें।

तच्छ्रुत्वा लघुपतनक आह—'भद्र, न भेतव्यमस्मद्विधैर्विद्यमानैः। यावदह द्रुततरं हिरण्यक गृहीत्वागच्छामि। अपर ये सत्पुरुषा भवन्ति ते व्यसन न व्याकुलत्वमुपयान्ति। उक्त च—

हि० अनु०:—यह सुनकर लघुपतनक बोला—'भाई, हम सरीखों के बने रहने पर तुम्हें नहीं डरना चाहिए। अभी मैं शीघ्र ही हिरण्यक को लेकर आता हूँ। दूसरे जो अच्छे पुरुष होते हैं वे सकट मे व्याकुल नही होते। कहा भी है—

सपदि यस्य न हर्षो विपदि विषादो रणे च भीरुत्वम्।
त भुवनत्रयतिलक जनयति जननी सुत विरलम् ॥१८०॥

अन्वयः—यस्य सपदि हर्षं विपदि विषादः रणे च भीरुत्वम् न (अस्ति), तम् भुवनत्रयतिलकम् विरलम् सुतम् जननी जनयति।

सं० टी०.—यस्य जनस्य सपदि सपत्तौ हर्षः प्रसन्नता विपदि विपत्तौ विषाद खिन्नता रणे युद्धे च भीरुत्वम् भीतत्वम् न अस्ति, तम् एतादृशम् भुवनत्रयतिलकम् त्रिलोकशिरोमणिम् विरलम् दुर्लभम् सुतम् पुत्रम् जननी माता जनयति उत्पादयति।

समास.—भुवनत्रयतिलकम्=भुवनानाम् त्रयम् (तत्पु०), तस्य तिलकम् (तत्पु०)।

व्या०:—भीरुत्वम्=भीरु+त्व।

शब्दार्थ —भीरुत्वम्=भीरुता, भय। विरलम्=विरले को। भुवनत्रय-तिलकम्=तीनों लोकों मे शिरोमणि।

हि० अनु०.—जिस को संपत्ति मे प्रसन्नता, विपत्ति मे विषाद (खिन्नता) और युद्ध मे भय नहीं होता ऐसे त्रिलोकशिरोमणि किसी विरले पुत्र को माता जन्म देती है।

एवमुक्त्वा लघुपतनकश्चित्राङ्गमाश्वास्य यत्र हिरण्यकमन्थरकौ तिष्ठतस्तत्र गत्वा सर्वं चित्राङ्गपाशपतन कथितवान्। हिरण्यक च चित्राङ्गपाशमोक्षण प्रति कृतनिश्चय पृष्ठमारोप्य भूयोऽपि सत्वरम् चित्राङ्गसमीपे गतः। सोऽपि मूषक-मवलोक्य किंचिज्जीविताशया संश्लिष्ट आह—

समास —चित्राङ्गपाशपतनम्=पाशे पतनम् (तत्पु०), चित्राङ्गस्य पाश-पतनम् (तत्पु०)। चित्राङ्गपाशमोक्षणम्=पाशात् मोक्षणम् (तत्पु०), चित्राङ्गस्य

पाशमोक्षणम् (तत्पु०)। कृतनिश्चयम्=कृत निश्चय येन तम् (बहु०)। किंचिज्जीविताशया=जीवितस्य आशा (तत्पु०), काचित् च असौ जीविताशा तया (कमधा०)।

व्या०—आश्वास्य=आ+णिजन्द 'श्वस्' (श्वास्)+क्त्वा (ल्यप=य)। कथितवान्=कथ्+इट् (इ)+क्तवतु (तवत्)। आरोप्य=आ+णिजन्त 'रुह्' (रोप्)+क्त्वा (ल्यप्=य)। संश्लिष्ट=सम्+श्लिष्+क्त (त)।

शब्दार्थ—आश्वास्य=आश्वस्त कर, सान्त्वना देकर। चित्राङ्गपाशपतनम्=चित्राङ्ग का जाल मे पड़ना। चित्राङ्गपाशमोक्षणम्=चित्राङ्ग का जाल से छुटकारा। कृतनिश्चयम्=निश्चय कर चुकने वाले को। संश्लिष्ट=युक्त।

हि० अनु०—ऐसा कहकर लघुपतनक ने चित्राङ्ग को आश्वस्त कर, हिरण्यक मन्थरक जहाँ थे, वहाँ जाकर उनसे चित्राङ्ग के जाल म गिरने के सम्पूर्ण वृत्तान्त को कहा और चित्राङ्ग के जाल से छुटकारे के प्रति निश्चय कर चुकने वाले हिरण्यक को पीठ पर रख कर फिर वह लौटकर शीघ्र ही चित्राग के पास गया। वह (चित्राङ्ग) भी चूहे को देखकर जीवन की कुछ आशा से युक्त हो बोला—

आपन्नाशाय विबुधैः कर्तव्याः सुहृदोऽमलाः।
न तरत्यापदं कश्चिद्योऽत्र मित्रविवर्जितः॥१८१॥

अन्वय—अपन्नाशाय विबुधैः अमलाः सुहृदः कर्तव्याः, अत्र यः मित्रविवर्जितः (अस्ति), कश्चित् आपदम् न तरति।

समास—आपन्नाशाय=आपदाम् नाशः तस्मै (तत्पु०)। मित्रविवर्जितः=मित्रैः विवर्जितः (तत्पु०)।

हि० अनु०—आपत्तियों के नाश के लिए विज्ञ जनों को निर्दोष (सच्चे) मित्र बनाने चाहिए, इस जगत् म जो मित्रों से विहीन है ऐसा कोई भी सकट को पार नहीं कर पाता है।

हिरण्यक आह—'भद्र, त्वं तावन्नीतिशास्त्रज्ञो दक्षमतिः। तत्कथमत्र कूटपाशे पतितः।' स आह—'भो', न कालोऽयं विवादस्य। तद्यावत् स

पापात्मा लुब्धक समभ्येति तावद् द्रुततरं कर्तयेमं मत्पादपाशम्।' तदाकर्ण्य विहस्याह हिरण्यक—'किं मय्यपि समायाते लुब्धकाद् बिभेषि। तत्र शास्त्रं प्रति महती मे विरक्ति सपन्ना, यद्भवद्विधा अपि नीतिशास्त्रविद एतामवस्थां प्राप्नुवन्ति। तेन त्वां पृच्छामि।' स आह—भद्र, कर्मणा बुद्धिरपि हन्यते। उक्तं च—

समास —नीतिशास्त्रज्ञ =नीतिशास्त्रम् जानाति (तत्पु०)। दक्षमति = दक्षा मतिः यस्य स (बहु०)। मत्पादपाशम्=मम पाशः (तत्पु०), तेषाम् पाशम् (तत्पु०)। नीतिशास्त्रविद =नीतिशास्त्रम् विदन्ति (तत्पु०)। भवद् विधा =भवान् विधा येषाम् ते (बहु०)।

व्या० —नीतिशास्त्रज्ञ =नीतिशास्त्र+ज्ञा+क (अ)। विरक्ति =वि+ रञ्ज+क्तिन (ति)। नीतिशास्त्रविद —नीतिशास्त्र+विद्+क्विप् (×)।

शब्दार्थ —दक्षमति =कुशल बुद्धि वाला। कूटपाशे=जाल में। द्रुततरम्=अति शीघ्र। मत्पादपाशम्=मेरे पैरों के बन्धन को। बिभेषि=डरते हो। विरक्ति =अरुचि, वैराग्य। भवद्विधा =आप सरीखे। नीतिशास्त्रविद =नीतिशास्त्र को जानने वाले। कर्मणा=भाग्य से। हन्यते=नष्ट हो जाती है, मारी जाती है।

हि०अनु० —हिरण्यक बोला—'भद्र, तुम तो कुशल बुद्धि वाले नीतिशास्त्रज्ञ हो। सो इस जाल में कैसे पड़ गए ?' वह बोला—'अरे यह विवाद करने का समय नहीं है, सो जब तक वह पापी बहेलिया न आवे तब तक बहुत जल्दी ही मेरे पैरों के बन्धन को काट दो।' यह सुन हिरण्यक हँसकर बोला—'क्या मेरे आने पर भी तुम बहेलिया से डरते हो ? चूँकि आप सरीखे भी नीतिशास्त्रवेत्ता इस दशा को प्राप्त हो जाते हैं, अतः शास्त्र के प्रति मेरी बड़ी अरुचि हो गई है, इसलिए तुम से पूछता हूँ।' वह बोला—'भाई, भाग्य से बुद्धि भी नष्ट हो जाती है (मारी जाती है)। कहा भी है—

कृतान्तपाशबद्धानां दैवोपहतचेतसाम्।
बुद्धयः कुब्जगामिन्यो भवन्ति महतामपि॥१८२॥

अन्वयः—कृतान्तपाशबद्धानाम् दैवोपहतचेतसाम् महताम् अपि बुद्धयः कुब्जगामिन्यः भवन्ति ।

समासः—कृतान्तपाशबद्धानाम्=कृतान्तस्य पाशः (तत्पु०), तेन बद्धानाम् (तत्पु०) । दैवोपहतचेतसाम्=दैवेन उपहतम् चेतः येषाम् तेषाम् (बहु०) । कुब्जगामिन्यः=कुब्जम् गच्छन्ति (उपपद तत्पु०) ।

व्या०:—बद्ध=बन्ध+क्त (त) । उपहत=उप+हन्+क्त (त) । कुब्जगामिन्यः=कुब्ज+गम्+णिनि (इन्)+ङीप् (ई) ।

शब्दार्थः—कृतान्तपाशबद्धानाम्=यम के पाश (जाल) से बँधे हुओं की । दैवोपहतचेतसाम्=भाग्य के कारण मूढ चित्त वालों की । कुब्जगामिन्यः= विपरीत या टेढ़ी चलने वाली ।

हि० अनु०:—यम के पाश (जाल) मे बँधे हुए और भाग्य से मूढ किए हुए चित्त वाले बड़े पुरुषों की भी बुद्धियाँ विपरीत दिशा मे जाने वाली हो जाती है ।

विधात्रा रचिता या सा ललाटेऽक्षरमालिका ।
न तां मार्जयितुं शक्ताः स्वबुद्ध्याप्यतिपण्डिताः ॥१८३॥

अन्वयः—विधात्रा ललाटे या सा अक्षरमालिका रचिता, ताम् स्वबुद्धया मार्जयितुम् अतिपण्डिताः अपि न शक्ताः ।

समास—अक्षरमालिका=अक्षराणाम् मालिका । अतिपण्डिताः=अतिशयिताः पण्डिताः (गति तत्पु०) ।

व्या०—विधात्र=वि+धा+तृच् (तृ) रचिता=रच्+इट् (इ)+क्त (त)+टाप् (आ) । मार्जयितुम्=मार्ज् (मार्जय्)+इट् (इ)+तुमुन् (तुम्) । शक्ता=शक्+क्त (त) ।

शब्दार्थ—अक्षरमालिका=अक्षरों की माला, लेख । मार्जयितुम्=धोने को, मेटने को । शक्ताः=समर्थ ।

हि० अनु०—विधाता ने ललाट मे जो कुछ (भाग्य का) लेख लिखा है, उसे अपनी बुद्धि से मेटने मे बड़े पण्डित भी समर्थ नहीं हैं ।

एव तयो प्रवदतो सुहृद्व्यसनसतप्तहृदयो मन्थरक शनै शनैस्त प्रदेश-माजगाम । त दृष्ट्वा लघुपतनको हिरण्यकमाह—'अहो, न शोभनमापतितम् ।' हिरण्यक आह—कि स लुब्धक समायाति । स आह—'आस्ता तावल्लुब्धक-वार्ता । एष मन्थरक समागच्छति । तदनीतिरनुष्ठितानेन, यतो वयमप्यस्य कारणान्नून व्यापादन यास्यामो यदि स पापात्मा लुब्धक समागमिष्यति । तदह तावत्खमुत्पतिष्यामि । त्व पुनर्बिल प्रविश्यात्मान रक्षयिष्यसि । चित्राङ्गोऽपि वेगेन दिगन्तर यास्यति । एष पुनर्जलचर स्थले कथ भविष्यतीति व्याकुलोऽस्मि ।

समास —सुहृद्व्यसनसतप्तहृदय —सुहृद व्यसनम् (तत्पु०), तेन सतप्तम् हृदयम् यस्य स (बहु०) । लुब्धकवार्ता=लुब्धकस्य वार्ता (तत्पु०) ।

व्या० —प्रवदतो =प्र+वद्+शतृ (अत्) । सतप्त=सम्+तप्+क्त (त) । आपतितम=आ+पत्+इट् (इ)+क्त (त) । अनुष्ठिता=अनु+स्था+क्त (त) । टाप् (अ) । व्यापादनम्=वि+आ+णिजन्त 'पद' (पाद)—ल्युट् (यु=अन) । प्रविश्य=प्र=विश्=क्त्वा (ल्यप्=य) ।

शब्दार्थ —सुहृद्व्यसनसतप्तहृदय =मित्र के सकट से दु खित हृदय वाला । शोभनम्=अच्छा । आपतितम्=हुआ । अनीति:=अनुचित बात । व्यापादनम्=मारा जाना । खम्=आकाश । उत्पतिष्यामि=उड जाऊँगा । दिगन्तरम्=दूसरी दिशा मे, इधर-उधर ।

हि० अनु०—इस प्रकार उन दोनो के बातें करने के समय मित्र के सकट से दु खित चित्त वाला मन्थरक धीरे धीरे उस स्थान पर आ रहा था । उसे देखकर लघुपतनक हिरण्यक से बोला— अरे, यह अच्छा नहीं हुआ । हिरण्यक बोला—'क्या वह बहेलिया आ गया ?' वह बोला—बहेलिया की बात तो रहने दो । यह मन्थरक आ रहा है, सो इसने यह अनुचित बात की है, क्योंकि इसके कारण हम भी निश्चय ही मारे जावगे, यदि वह पापी बहेलिया आवेगा तो मैं तो आकाश मे उड जाऊगा और तुम बिल मे घुसकर अपनी रक्षा कर लोगे । चित्राङ्ग भी वेग के साथ इधर-उधर कहीं चला जावेगा । किन्तु यह जलचर स्थल मे क्या करेगा, इसलिए मैं व्याकुल हूँ ।

अत्रान्तरे प्राप्तोऽयं मन्थरकः। हिरण्यक आह—'भद्र, न युक्तमनुष्ठितं भवता, यदत्र समायातः। तद्भूयोऽपि द्रुततरं गम्यताम्, यावदसौ लुब्धको न समायाति।' मन्थरक आह—'भद्र, किं करोमि, न शक्नोमि तत्रस्थो मित्रव्यसनाग्निदाहं सोढुम्। तेनाहमत्रागतः। अथवा साध्विदमुच्यते—

समासः—मित्रव्यसनाग्निदाहम्=मित्रस्य व्यसनम् (तत्पु०), तदेव अग्निः (कर्मधा०) तेन दाहः तम् (तत्पु०)।

व्या०:—अनुष्ठितम्=अनु+स्था+क्त (त)। सोढुम्=सह+तुमुन् (तुम्)।

शब्दार्थः—द्रुततरम्=अति शीघ्र। मित्रव्यसनाग्निदाहम्=मित्र के संकट रूपी अग्नि की जलन को। सोढुम्=सहन करने।

हि० अनु०:—इस बीच में यह मन्थरक आ गया। हिरण्यक ने कहा—'भद्र, आपने यह ठीक नहीं किया, जो कि यहाँ आए। सो अब फिर लौटकर अति शीघ्र चले जाओ, जब तक कि यह बहेलिया न आवे।' मन्थरक बोला—'भद्र, क्या करूँ, वहाँ रहकर मित्र के संकट रूपी आग की जलन को सहने में असमर्थ हूँ। इसलिए यहाँ आ गया। अथवा यह ठीक कहा जाता है—

दयितजनविप्रयोगो वित्तवियोगश्च केन सह्याः स्युः।
यदि सुमहौषधकल्पो वयस्यजनसंगमो न स्यात् ॥१८४॥

अन्वय.—यदि सुमहौषधकल्पः वयस्यजनसंगमः न स्यात् (तर्हि) दयितजनविप्रयोगः वित्तवियोगः च केन सह्याः स्युः।

समासः—सुमहौषधकल्पः=महत् तत् औषधम् (कर्मधा०), शोभनम् महौषधम् (गति तत्पु०), ईषदूनम् सुमहौषधम् (तद्धित)। दयितजनविप्रयोगः=दयिताश्च ते जनाः (कर्मधा०), तेषाम् विप्रयोगः (तत्पु०) वित्तवियोगः=वित्तस्य वियोगः (तत्पु०) वयस्यजनसंगमः=वयस्याश्च ते जनाः (कर्मधा०), तेषाम् संगमः (तत्पु०)।

व्या०—सुमहौषधकल्पः=सुमहौषध+कल्पप् (कल्प)। वयस्य=वयस्+

यत् (य)। विप्रयोगः=वि+प्र+युज्+घञ् (अ)। वियोग=वि+युज्+घञ् (अ)।

शब्दार्थ—सुमहौषधकल्पः=उत्तम महौषध के समान। वयस्यजनसंगमः=अपनी उम्र के साथी लोगों का मिलन। दयितजनविप्रयोगः=प्रिय जनों का वियोग।

हि० अनु०.—यदि उत्तम महौषध के समान समवयस्क लोगों का मिलन न हो तो प्रियजनों के वियोग तथा धन के वियोग को कौन सहन कर सकता है?

> वरं प्राणपरित्यागो न वियोगो भवादृशैः।
> प्राणा जन्मान्तरे भूयो भवन्ति न भवद्विधा ॥१८५॥

अन्वयः—सीधा है।

समास.—प्राणपरित्याग.=प्राणानाम् परित्यागः। जन्मान्तरे=अन्यद् जन्म तस्मिन् (नित्य तत्पु०)। भवद्विधा.=भवन्तः विधा येषाम् ते (बहु०)।

व्या०:—परित्याग.=परि+त्यज्+घञ् (अ)।

हि० अनु०:—प्राणों का परित्याग (छूट जाना या छोड़ना) अच्छा, किन्तु आप सरीखों (प्रिय जनों) का वियोग अच्छा नहीं। प्राण तो फिर भी दूसरे जन्म में मिल जाते हैं, किन्तु आप सरीखे (प्रिय जन) नहीं मिलते।

एवं तस्य प्रवदतः आकर्णपूरितशरासनो लुब्धकोऽप्युपागत.। तं दृष्ट्वा मूषकेण तस्य स्नायुपाशस्तत्क्षणात्खण्डितः। अत्रान्तरे चित्राङ्गः सत्वरं पृष्ठमवलोकयन् प्रधावित.। लघुपतनको वृक्षमारूढ.। हिरण्यकश्च समीपवर्तिबिलं प्रविष्टः।

समासः—आकर्णपूरितशरासन.=आ कर्णात् (अव्ययी०), आकर्णम् पूरितम् शरासनम् येन सः (बहु०)।

व्या.०—खण्डितः=खण्ड्+इट् (इ)+क्त (त)।

शब्दार्थः—आकर्णपूरितशरासनः=कान तक धनुष को फैलाए या खींचे हुए। स्नायुपाशः=तांत से बना हुआ बन्धन (जाल)।

हि० अनु० —उसके इस प्रकार बात करते हुए ही कान तक धनुष को खींचे हुए बहेलिया भी आ गया। उसको देखकर चूहे ने उसका ताँतों का बन्धन उसी क्षण काट दिया। इस बीच में चित्राङ्ग शीघ्र पीछे को देखता हुआ दौड़ गया। लघुपतनक वृक्ष पर चढ़ गया और हिरण्यक निकटवर्ती बिल में घुस गया।

अथासौ लुब्धको मृगगमनाद् विषण्णवदनो व्यर्थश्रमस्तं मन्थरकं मन्दं मन्दं स्थलमध्ये गच्छन्तं दृष्टवान्, अचिन्तयच्च—'यद्यपि कुरङ्गो धात्रापहृतस्तथाप्ययं कूर्म आहाराय सम्पादितः। तदद्यास्यामिषेण मे कुटुम्बस्याहारनिवृत्तिर्भविष्यति।' एवं विचिन्त्य तं दर्भैः सञ्छाद्य धनुषि समारोप्य स्कन्धे कृत्वा गृहं प्रति प्रस्थितः। अत्रान्तरे तं नीयमानमवलोक्य हिरण्यको दुःखाकुलः पर्यदेवयत्—'कष्टं भोः, कष्टमापतितम्।

समास —विषण्णवदनः =विषण्णम् वदनम् यस्य सः (बहु०)। व्यर्थश्रमः = व्यर्थः श्रमः यस्य सः (बहु०)। आहारनिवृत्तिः =आहारस्य निवृत्तिः (तत्पु०) दुःखाकुलः =दुःखेन आकुलः (तत्पु०)।

व्या—विषण्णः=वि+सद्+क्त (त)। अपहृतः =अप+हृ+क्त (त)। सम्पादितः =सम्+णिजन्त 'पद्' (पादि)+इट (इ)+क्त (त)। निवृत्तिः= निर्+वृत्—क्तिन् (ति)। विचिन्त्य=वि+चिन्त्+क्त्वा (ल्यप्=य)। सञ्छाद्य=सम्—छद् (छाद्)=क्त्वा (ल्यप=य)। समारोप्य=सम्+आ+णिजन्त 'रुह्' (रोप)+क्त्वा (ल्यप=य)।

शब्दार्थ —विषण्णवदनः=विषादयुक्त (फीका) मुख वाला। आमिषेण= मांस से। आहारनिवृत्तिः=भोजन का सम्पादन। दर्भैः=कुशों से। सञ्छाद्य= ढाँक कर। समारोप्य=रख कर। पर्यदेवयत्=रोया, रोने लगा।

हि० अनु० —इसके बाद बहेलिये ने मृग के जाने के कारण विषादयुक्त (फीका) मुख वाला एवं व्यर्थ परिश्रम वाला हो उस मन्थरक को स्थल के ऊपर धीरे धीरे जाते हुए देखा और सोचा—'यद्यपि विधाता ने वह हरिन ले लिया फिर भी यह कछुवा भोजन के लिए दे दिया। सो आज इसके मांस से मेरे कुटुम्ब के आहार का सम्पादन होगा।' ऐसा सोचकर उसको कुशों से

टक मर, धनुष के ऊपर रस, कन्धे पर लटकाकर घर के लिए चल दिया। तब उसको लिया आता हुआ देखकर हिरण्यक दुःख से व्याकुल हो रोने लगा—'अरे, सकट आया, सकट आ पड़ा।

एकस्य दुःखस्य न यावदन्तम्,
गच्छाम्यहं पारमिवार्णवस्य।
तावद् द्वितीयं समुपस्थितं मे,
छिद्रेष्वनर्था बहुलीभवन्ति ॥१८६॥

अन्वय—अहम् यावत् एकस्य दुःखस्य अन्तम् अर्णवस्य पारम् इव न गच्छामि, तावत् मे द्वितीयम् समुपस्थितम्, छिद्रेषु अनर्थाः बहुलीभवन्ति।

स० टी०—अहम् यावत् यत्कालपर्यन्तम् एकस्य दुःखस्य सकटस्य अन्तम् अवसानम् अर्णवस्य समुद्रस्य पारम् तीरम् इव यथा न गच्छामि प्राप्नोमि, तावद् मे मम द्वितीयम् दुःखम् समुपस्थितम् आगतम्, छिद्रेषु सकटेषु अनर्थाः सकटाः बहुलीभवन्ति सम्भूय समागच्छन्ति।

समास—बहुलीभवन्ति=अबहुलाः बहुलाः भवन्ति (च्वितत्पु०)।

व्या०—बहुलीभवन्ति=बहुल+च्वि (X)+भवन्ति।

शब्दार्थ—छिद्रेषु=कमियों में, सकटों में। बहुलीभवन्ति=इकट्ठे हो जाते हैं।

हि० अनु०—मैं जब तक समुद्र के पार जाने के समान एक दुःख के अन्त तक नहीं पहुँच पाया तब तक मेरे ऊपर दूसरा दुःख आ गया। (ठीक है)। सकटों के आने पर (अन्य) सकट भी आकर इकट्ठे हो जाते हैं।

यावदस्खलितं तावत् सुखं याति समे पथि।
स्खलिते च समुत्पन्ने विषमं च पदे पदे ॥१८७॥

अन्वय—यावत् अस्खलितम् तावत् समे पथि सुखम् याति, स्खलिते समुत्पन्ने च पदे पदे च विषमम् (भवति)।

समास—अस्खलितम्=न स्खलितम् (नञ् तत्पु०)।

व्या०:—अस्खलितम्=नञ् (अ) + स्खल् + इट् (इ) + क्त (त)। समुत्पन्ने=सम्+उत्+पद्+क्त (त)।

शब्दार्थ—अस्खलितम्=न फिसलना, फिसलने का अभाव। समे=एक से, चौरस।

हि० अनु०:—जब तक फिसलना नहीं होता, तब तक (व्यक्ति) चौरस रास्ते पर सुखपूर्वक चला जाता है, किन्तु एक बार फिसलने पर कदम-कदम पर फिसलन होती या ऊँचे-नीचे पैर पड़ते हैं।

यन्नम्रं सरलं चापि तच्चापत्सु न सीदति।
धनुर्मित्रं कलत्रं च दुर्लभं शुद्धवंशजम् ॥१८८॥

अन्वयः—यत् नम्रम् सरलम् च अपि, तत् च आपत्सु न सीदति (एतादृशम्) शुद्धवंशजम् धनुः मित्रम् कलत्रम् च दुर्लभम्।

समास—शुद्धवंशजम्=शुद्धश्चासौ वंशः (तत्पु०), तस्माज्जातम् (उपपद-तत्पु०)।

व्या०:—शुद्धवंशजम्=शुद्धवंश+जन्+ड (अ)।

हि० अनु०:—जो नम्र और सरल भी होता है, वह आपत्तियों में दुःखी नहीं होता। शुद्ध वंश (कुल, बाँस) से उत्पन्न ऐसे धनुष, मित्र और कलत्र (स्त्री) दुर्लभ हैं।

न मातरि न दारेषु न सोदर्ये न चात्मजे।
विश्रम्भस्तादृशः पुंसां यादृङ् मित्रे निरन्तरे ॥१८९॥

अन्वय—पुंसाम् तादृशः विश्रम्भः न मातरि न दारेषु न सोदर्ये न च आत्मजे (भवति), यादृग् निरन्तरे मित्रे (भवति)।

समासः—निरन्तरे=नास्ति अन्तरम् यस्मिन् तस्मिन् (बहु०)।

हि० अनु०:—पुरुषों का वैसा विश्वास न माता में होता है, न पत्नियों में, न सहोदर भाई में और न पुत्र में, जैसा कि किसी प्रकार का अन्तर या दुराव न रखने वाले मित्र में होता है।

यदि तावत् कृतान्तेन मे धननाशो विहितस्तन्मार्गश्रान्तस्य मे विश्राममूत मित्र कस्मादपहृतम् । अपरमपि मित्र पर मन्थरकसम न स्यात् । उक्त च—

हि० अनु०—यदि दैव ने मेरे धन का नाश कर दिया तो मार्ग से थके हुए मुझको विश्राम देने वाला मित्र क्यो छीन लिया, दूसरा भी मित्र हो सकता है, किन्तु मन्थरक के समान नही हो सकता । कहा भी है—

असंपत्तौ परो लाभो गुह्यस्य कथन तथा ।
आपद्विमोक्षण चैव मित्रस्यैतत्फलत्रयम् ॥१६०॥

अन्वय—(सीधा है) ।

हि० अनु०—सपत्ति न रहने पर परम लाभ, गोपनीय बात का कथन और आपत्तियो से छुटकारा, ये मित्र के तीन फल या लाभ है ।

तदस्य पश्चान्नान्य सुहृन्मे । तत्किं ममोपर्यनवरत व्यसनशरैर्वर्षति हन्त विधि । यत आदौ तावद् वित्तनाश , ततः परिवारभ्रशः, ततो देशत्याग , ततो मित्रवियोग इति । अथवा स्वरूपमेतत् सर्वेषामेव जन्तूना जीवितधर्मस्य । उक्त च—

समास —व्यसनशरै.=व्यसनानाम् शतानि तैं (तत्पु०) । वित्तनाश = वित्तस्य नाश (तत्पु०) परिवारभ्रश =परिवारस्य परिवाराद वा भ्रश (तत्पु०) देशत्याग =देशस्य त्यागः (तत्पु०) मित्रवियोग =मित्रस्य मित्राद वा वियोगः (तत्पु०) । जीवितधर्मस्य=जीवितस्य धर्म तस्य (तत्पु०), अथवा—जीवितमेव धर्म तस्य (कर्मधा०) ।

व्या० —त्याग =त्यज्+घञ् (अ) । जीवित=जीव्+इट् (इ)+क्त (त) ।

शब्दार्थ —अनवरतम्=निरन्तर । हन्त=खेद है !, हाय ! परिवारभ्रश =परिवार से बिछुडना । जीवितधर्मस्य=जीवन के धर्म या जीवन रूपी धर्म का ।

हि० अनु० —सो इसके बाद मेरा कोई दूसरा सुहृद नहीं है । सो हाय ! विधाता मेरे ऊपर निरन्तर सैकडो सकटो की बौछार क्यों कर रहा है ?

क्योकि पहले तो धन का नाश, फिर परिवार से बिछुड़ना, फिर देश का त्याग और फिर मित्र का वियोग। अथवा यह सभी प्राणियो के जीवन रूपी धर्म का अर्थात् जीवन का स्वरूप ही है। कहा भी है—

कायः सन्निहितापाय. सपदः क्षणभंगुरा।
समागमाः सापगमा· सर्वेषामेव देहिनाम् ॥१६१॥

अन्वय·—(सीधा है)।

समास —सन्निहितापाय = सन्निहिता अपाया· यस्य यस्मिन् वा (बहु०)। क्षणभगुरा = क्षणे भगुरा· (तत्पु०)। सापगमा = अपगमेन सहिताः (तत्पु०)।

व्या —काय = चि + घञ् (अ), धातु के 'च्' को 'क्'। सन्निहित = सम् + नि + धा (हि) + क्त (त) अपाय = अप + इ + घञ् (अ)।

शब्दार्थ —काय = शरीर। सन्निहितापाय· = जिसमे विघ्न या सकट भरे हुए हैं। सापगमा = वियोगयुक्त। क्षणभगुरा = क्षण म नष्ट होने वाली।

हि० अनु० —सभी शरीरधारियो के शरीर विघ्न या सकटो (रोग आदि) से पूर्ण हैं, सपत्तियाँ क्षण म नष्ट वाली हैं और मिलन वियोग से युक्त हैं।

तथा च।

हि० अनु० —और भी।

क्षते प्रहारा निपतन्त्यभीक्ष्णम्
धनक्षये दीप्यति जाठराग्निः।
आपत्सु वैराणि समुल्लसन्ति
छिद्रेष्वनर्था बहुलीभवन्ति।

अन्वय —क्षते अभीक्ष्णम् प्रहारा. निपतन्ति, धनक्षये जाठराग्नि दीप्यति, आपत्सु वैराणि समुल्लसन्ति, छिद्रेषु अनर्था बहुलीभवन्ति।

स० टी०·—क्षते व्रणे आहते वा स्थाने अभीक्ष्णम् नित्यम् प्रहारा· आघाता· निपतन्ति आगच्छन्ति, धनक्षये वित्ताभावे जाठराग्निः उदरानल दीप्यति दीप्तः भवति, आपत्सु आपत्तिषु वैराणि शत्रुभावा समुल्लसन्ति वर्धन्ते, छिद्रेषु त्रुटिषु मर्मस्थलेषु वा अनर्था सकटा बहुलीभवन्ति प्रभूत भवन्ति·।

समासः—धनक्षये=धनस्य क्षये (तत्पु०) ।

व्या०:—क्षते=क्षण्+क्त (त) । प्रहारा=प्र+हृ+घञ् (अ) ।

शब्दार्थः—क्षते=घाव या चोट वाले स्थान मे । अभीक्ष्णम्=नित्य, बारम्बार । प्रहाराः=चोटें । निपतन्ति=आती हैं, लगती हैं । जाठराग्नि.=पेट की अग्नि । समुल्लसन्ति=बढते हैं । छिद्रेषु=कमियो मे, सकटो मे । अनर्थाः=सकट । बहुलीभवन्ति=आकर इकट्ठे हो जाते हैं ।

हि० अनु०:—घाव या चोट वाले स्थान में बारम्बार चोटें लगती हैं । धन का नाश होने पर पेट की अग्नि प्रदीप्त होती है, आपत्तियो मे वैर बढते हैं, सकट की दशाओ मे अन्य सकट भी आकर इकट्ठे हो जाते हैं ।

अहो साधूक्तं केनापि—

हि० अनु०:—अरे, यह किसी ने ठीक कहा है—

> प्राप्ते भये परित्राणं प्रीतिविश्रम्भभाजनम् ।
> केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम् ॥१९३॥

अन्वयः—भये प्राप्ते परित्राणम् प्रीतिविश्रम्भभाजनम् मित्रम् इति अक्षर-द्वयम् इदम् रत्नम् केन सृष्टम् ।

समासः—प्रीतिविश्रम्भभाजनम्=प्रीतिश्च विश्रम्भश्च (द्वन्द्व), तयोः भाजनम् (तत्पु०) । अक्षरद्वयम्=अक्षरयोः द्वयम् (तत्पु०) ।

व्या०:—सृष्टम्=सृज्+क्त (त) । परित्राणम्=परि+त्रा+ल्युट् (यु=अन) ।

शब्दार्थ.—परित्राणम्=रक्षक । प्रीतिविश्रम्भभाजनम्—स्नेह और विश्वास का पात्र । सृष्टम्=बनाया ।

हि० अनु०:—सकट के प्राप्त होने पर रक्षा करने वाला और स्नेह तथा विश्वास का पात्र 'मित्र' यह अक्षर-युगल (अक्षरो की जोडी) रूपी रत्न किसने बनाया है ?

अत्रान्तरे चाक्रन्दपरौ चित्राङ्गलघुपतनकौ तत्रैव समायातौ । अथ हिरण्यक

आह—'अहो किं वृथा प्रलपितेन । तद्यावदेष मन्थरको दृष्टिगोचरान्न नीयते, तावदस्य मोक्षोपायश्चिन्त्यताम्' इति । उक्तं च—

हि० अनु०:—इस बीच में चित्राङ्ग और लघुपतनक रोते हुये वहीं आए। तब हिरण्यक बोला—'अरे, व्यर्थ रोने से क्या लाभ है, सो जब तक यह मन्थरक हमारी दृष्टि से ओझल नहीं किया जावे, तब तक इसके छुड़ाने का उपाय सोचिए।'

कहा भी है—

> व्यसनं प्राप्य यो मोहात् केवलं परिदेवयेत् ।
> क्रन्दनं वर्धयत्येव तस्यान्तं नाधिगच्छति ॥१६४॥

अन्वयः—यः व्यसनम् प्राप्य मोहात् केवलम् परिदेवयेत् (सः) क्रन्दनम् वर्धयति एव तस्य अन्तम् न अधिगच्छति ।

व्या०:—क्रन्दनम्=क्रन्द्+ल्युट् (यु=अन) ।

शब्दार्थः—परिदेवयेत्=रोवे, रोता है । क्रन्दनम्=रोना, रोदन ।

हि० अनु०:—जो संकट को प्राप्त कर मोहवश केवल रोता है, वह रोदन को बढ़ाता ही है, उस संकट के पार नहीं जाता है।

> केवलं व्यसनस्योक्तं भेषजं नयपण्डितैः ।
> तस्योच्छेदसमारम्भो विषादपरिवर्जनम् ॥१६५॥

अन्वय—नयपण्डितैः व्यसनस्य केवलम् भेषजम् उक्तम् (यत्) तस्य उच्छेद समारम्भः, विषादपरिवर्जनम् ।

समासः—नयपण्डितैः=नयस्य पण्डितैः (तत्पु०) उच्छेदसमारम्भः=उच्छेदस्य समारम्भः (तत्पु०) । विषादपरिवर्जनम्=विषादस्य परिवर्जनम् (तत्पु०) ।

व्या०:—उच्छेद=उत्+छिद्+घञ् (अ) । समारम्भः=सम्+आ+रभ्+घञ् (अ) । विषाद=वि+सद्+घञ् (अ) । परिवर्जनम्=परि+वृज्+ल्युट् (यु=अन) ।

शब्दार्थ —उच्छेदसमारम्भः=नष्ट करने का आरम्भ । विषादपरिवर्जनम्=विषाद या खिन्नता का परित्याग ।

हि० अनु०—नीति के पण्डितो ने सकट की एक मात्र यह औषध बताई है कि उसको नष्ट करने का आरम्भ और विषाद या खिन्नता का परित्याग ।

अन्यच्च ।

हि० अनु०:—और भी ।

अतीतलाभस्य सुरक्षणार्थम् ।
भविष्यलाभस्य च सगमार्थम् ।
आपत्प्रपन्नस्य च मोक्षणार्थम् ।
यन्मन्त्र्यतेऽसौ परमो हि मन्त्रः ॥१६६॥

अन्वय.—अतीतलाभस्य सुरक्षणार्थम् भविष्यलाभस्य च सङ्गमार्थम् आपत्प्रपन्नस्य च मोक्षणार्थम् यत् मन्त्रते असौ परम· मन्त्रः हि ।

स० टी०:—अतीतलाभस्य प्राप्तलाभस्य सुरक्षणार्थम् सरक्षणार्थम्, भविष्यलाभस्य आगमिष्यमाणलाभस्य च सगमार्थम् प्राप्त्यर्थम्, आपत्प्रपन्नस्य विपद्ग्रस्तस्य च मोक्षणायम् मोक्षार्थम् यत् यत् किञ्चिदपि मन्त्र्यते मन्त्रण क्रियते असौ स. परमः सर्वोत्तमः मन्त्रः मन्त्रणा अस्ति ।

समासः—अतीतलाभस्य=अतीतश्च असौ लाभ. (कर्मधा०) । भविष्यलाभस्य=भविष्यश्चासौ लाभ (कर्मधा०) आपत्प्रपन्नस्य=आपदम् प्रपन्नस्य (तत्पु०) ।

व्या ०—अतीत=अति=इ=क्त (त) प्रपन्न=प्र+पद्+क्त (त) ।

शब्दार्थ=अतीतलाभस्य=प्राप्त हुए लाभ के । भविष्यलाभस्य=होने वा[ले] लाभ के । आपत्प्रपन्नस्य=आपत्ति मे फँसे हुए के । मन्त्र्यते=सलाह की जाती है । मन्त्रः=सलाह ।

हि० अनु०:—प्राप्त हुए लाभ की सुरक्षा के लिए, आगे होने वाले लाभ की प्राप्ति के लिए, आपत्ति मे फँसे हुए को छुड़ाने के लिए जो सलाह की जाती है, वह सर्वोत्तम सलाह है ।

तच्छ्रुत्वा वायस आह—'भो, यद्येवं तत्क्रियतां मद्वचः । एष चित्राङ्गोऽस्य मार्गे गत्वा किञ्चित्पल्वलमासाद्य तस्य तीरे निश्चेतनो भूत्वा पततु । अहमप्यस्य शिरसि समारुह्य मन्दैश्चञ्चुप्रहारैः शिर उल्लेखयिष्यामि, येनासौ दुष्टलुब्धकोऽमुं मृतं मत्वा मम चञ्चुप्रहरणप्रत्ययेन मन्थरकं भूमौ क्षिप्त्वा मृगार्थं परिधाविष्यति । अत्रान्तरे त्वया दर्भमयानि पाशानि, खण्डनीयानि येनासौ मन्थरको द्रुततरं पल्वलं प्रविशति ।' चित्राङ्ग आह—'भोः, भद्रोऽयं त्वया दृष्टो मन्त्रः । नूनं मन्थरकोऽयं मुक्तो मन्तव्य' इति । उक्तं च—

समास—निश्चेतन=नास्ति चेतना यस्य सः (बहु०) चञ्चुप्रहारैः=चञ्चोः प्रहारैः (तत्पु०) । चञ्चुप्रहरणप्रत्ययेन=चञ्चोः प्रहरणम् (तत्पु०), तस्य प्रत्ययेन (तत्पु०) ।

व्या०:—आसाद्य=आ+सद (साद)+क्त्वा (ल्यप्=य) । मत्वा=मन्+क्त्वा (त्वा) । प्रहरण=प्र+हृ+ल्युट् (यु=अन) । प्रत्यय=प्रति+इ+अच् (अ) । क्षिप्त्वा=क्षिप्+क्त्वा (त्वा) । दर्भमयानि=दर्भ+मयट् (मय) ।

शब्दार्थ—पल्वलम्=छोटे तालाब पर । आसाद्य=पहुँच कर । निश्चेतन=चेतनाहीन, बेहोश, मरा हुआ । चञ्चुप्रहारैः=चोंच के प्रहारों से । उल्लेखयिष्यामि=नोचूँगा, खोट मारूँगा । चञ्चुप्रहरणप्रत्ययेन=चोंच की चोटों की प्रतीति (विश्वास) से । क्षिप्त्वा=फेंककर । परिधाविष्यति=दौड़ेगा । दर्भमयानि=कुश से बने हुए । पाशानि=जालों को । खण्डनीयानि=काटने चाहिए । द्रुततरम्=अति शीघ्र ।

हि० अनु०—यह सुनकर कौआ बोला—'अरे, यदि ऐसा है तो मेरी बात मानिए । यह चित्राङ्ग इस बहेलिए के मार्ग में जाकर किसी तालाब पर पहुँच उसके किनारे चेतनाहीन होकर गिर पड़े । मैं भी इसके सिर पर बैठकर चोंच की धीमी चोटों से सिर को नोचूँगा, जिससे यह दुष्ट बहेलिया इसको मरा हुआ समझकर मेरी चोंच की चोटों के विश्वास से मन्थरक को भूमि पर पटक कर मृग के लिए दौड़ेगा । इस बीच में तुम्हें कुश से बने हुए बन्धन काट देने चाहिए जिससे यह मन्थरक अति शीघ्र तालाब में घुस जायगा ।

चित्राङ्ग बोला—'अरे तुमने यह बहुत उत्तम उपाय सोचा। निश्चय ही इस मन्थरक को छूटा हुआ समझिए। कहा भी है—

सिद्धं वा यदि वाऽसिद्धं चित्तोत्साहो निवेदयेत्।
प्रथमं सर्वजन्तूनां तत्प्रज्ञो वेत्ति नेतरः ॥१६७॥

अन्वय—सर्वजन्तूनाम् चित्तोत्साहः सिद्धम् वा यदि वा असिद्धम् प्रथमम् निवेदयेत्, तत्प्रज्ञः वेत्ति इतरः न।

समास—सर्वजन्तूनाम्=सर्वे च ते जन्तवः तेषाम् (कर्मधा०)। चित्तोत्साहः=चित्तस्य उत्साहः। (तत्पु०)। तत्प्रज्ञः=तस्य प्रज्ञः (तत्पु०)।

व्या०—प्रज्ञ=प्र+ज्ञा+क (अ)।

शब्दार्थ—सर्वजन्तूनाम्=सब प्राणियों का। तत्प्रज्ञः=उसका जानकार।

हि० अनु०—सब प्राणियों के चित्त का उत्साह सिद्ध होने वाले या असिद्ध होने वाले काम को पहले से ही बता देता है उसका जानकार यह जानता है दूसरा नहीं।

तन्त्रैव क्रियताम् इति।

हि० अनु०—सो ऐसा कीजिए।

तथानुष्ठिते स लुब्धकस्तथैव मार्गासन्नपल्वलतीरस्थं चित्राङ्गं वायससनाथमपश्यत्। तं दृष्ट्वा हर्षितमना व्यचिन्तयत—नूनं पाशबन्धनवेदनया वराकोऽयं मृगः सावशेषजीवितः पाशं त्रोटयित्वा कथमप्येनद्वनान्तरं यावत्प्रविष्टस्तावन्मृतः। तद्वश्योऽयं मे कच्छपः सुयन्त्रितत्वात्। तदेनमपि तावद्गृह्णामि।' इत्यवधार्य कच्छपं भूतले प्रक्षिप्य मृगमुपाद्रवत्।

समास—मार्गासन्नपल्वलतीरस्थम्=मार्गम् आसन्नम् (तत्पु०) तत् च तत् पल्वलम् (कर्मधा०) तस्य तीरम् (तत्पु०) तस्मिन् तिष्ठति (उपपद तत्पु०)। वायससनाथम्=वायसेन सनाथम् (तत्पु०)। हर्षितमनाः=हर्षितम् मनः यस्य सः (बहु०)। सावशेषजीवितः=अवशेषेण सहितम् (तत्पु०)। सावशेषम् जीवितम् यस्य सः (बहु०)। पाशबन्धनवेदनया=पाशेन बन्धनम् (तत्पु०) तेन वेदना तया (तत्पु०)।

व्या०—आसन्न=आ+सद्+क्त (त)। त्रोटयित्वा=णिजन्त 'त्रुट्' (त्रोटय्)+इट् (इ)+क्त्वा (त्वा)। अवधार्य=अव+णिजन्त 'धृ' (धार्)+क्त्वा (ल्यप्=य)। प्रक्षिप्य=प्र+क्षिप्+क्त्वा (ल्यप्=य)।

शब्दार्थः—मार्गासन्नपल्वलतीरस्थम्=मार्ग के समीपवर्ती तालाब के किनारे स्थित को। वायसनाथम्=कौए के सहित को। व्यचिन्तयत्=सोचने लगा। पाशावन्धनवेदनया=जाल के बन्धन की वेदना से। वराकः=बेचारा। सावशेष-जीवितः=अवशिष्ट जीवन वाला। त्रोटयित्वा=ताड कर। वनान्तरम्=दूसरे वन मे। वश्यः=वश मे रहने वाला। सुयन्त्रितत्वात्=अच्छी तरह बँधा हुआ होने के कारण। अवधार्य=निश्चय कर। प्रक्षिप्य=फेंककर। उपाद्रवत्=भागा।

हि० अनु०:—वैसा करने पर उस बहेलिया ने उसी प्रकार मार्ग के समीप-वर्ती तालाब के किनारे पर पडे हुए चित्राङ्ग को कौए के साथ देखा। उसको देखकर प्रसन्नचित हो सोचने लगा—'निश्चय ही यह बेचारा मृग जाल के बन्धन की पीडा से कुछ अवशिष्ट जीवन वाला हो, जाल को तोडकर जैसे-तैसे इस दूसरे वन में ज्यो हा घुसा है त्यों ही मर गया है। सो यह कछवा तो अच्छी तरह बँधा रहने के कारण मेरे वश मे है, अतः इसको भी पकड लूँ।' ऐसा निश्चय कर कछवे को जमीन पर पटक कर हरिण की ओर दौडा।

एतस्मिन्नन्तरे हिरण्यकेन वज्रोपमदंष्ट्राप्रहरणेन तद्दर्भवेष्टनम् खण्डश-कृतम्। मन्थरकोऽपि तृणमध्यान्निष्क्रम्य समीपवर्तिनं पल्वलं प्रविष्टः। चित्रा-ङ्गोऽप्यप्राप्तस्यापि तस्य तल उत्थाय वायसेन सह पलायितः। एतस्मिन्नन्तरे विलक्षो विषादपरो लुब्धको निवृत्तो यावत् पश्यति, तावत्कच्छपोऽपि गतः। ततश्च तत्रोपविश्येमं श्लोकमपठत्—

समास—वज्रोपमदंष्ट्राप्रहरणेन=वज्रम् उपमा यासाम् ताः (बहु०), ताश्च ताः दंष्ट्राः (कर्मधा०), ता एव प्रहरणम् तेन (तत्पु०)। दर्भवेष्टनम् दर्भ-निर्मित वेष्टनम् (मध्यमपदलोपी कर्मधा०)। विषादपरः=विषादे परः (तत्पु०)।

व्या०:—प्रहरण=प्र+हृ+ल्युट् (यु=अन)। वेष्टनम्=वेष्ट्+ल्युट्

(यु=अन) । निष्क्रम्य=निस् + क्रम् + क्त्वा (ल्यप्=य) । समीपवर्तिनम्= समीप + वृत् + णिनि (इन्) । उत्थाय=उत् + स्था + क्त्वा (ल्यप्=य) । पलायित =परा + अय् + इट् (इ) + क्त (त) । निवृत्तः=नि + वृत् + क्त (त) । उपविश्य=उप + विश् + क्त्वा (ल्यप्=य) ।

शब्दार्थ.—वज्रोपमदंष्ट्राप्रहरणेन=वज्र के समान दाढ रूपी शस्त्र से । दर्भवेष्टनम्=कुशा से बने हुए लपेटन या बंधने को । खण्डशः=टुकडे-टुकडे । निष्क्रम्य=निकल कर । तले=तल या जमीन मे । पलायित =भाग गया । विलक्ष =भौचक्का । विषादपरः=खिन्न होता हुआ । उपविश्य=बैठ कर ।

हि० अनु०:—इस बीच मे हिरण्यक ने वज्र के समान दाढ रूपी शस्त्र से उस कुशनिर्मित बंधने को टुकडे टुकडे कर दिया । मन्थरक भी तृणो के मध्य से निकलकर पास के तालाव मे घुस गया । चित्राङ्ग भी उसके पहुँचने से पहले जमीन पर उठकर कौए के साथ भाग गया । इस बीच मे भौचक्का और खिन्न बहेलिया लौटकर जब देखता है तब तक कछुवा भी चला गया । तब उसने वही बैठकर यह श्लोक पढा—

> प्राप्तो बन्धनमप्यय बहुमृतस्तावत्त्वया मे हृत.,
> संप्राप्तः कमठः स चापि नियत नष्टस्तवादेशतः ।
> क्षुत्क्षामोऽत्र वने भ्रमामि शिशुकैस्त्यक्त. सम भार्यया,
> यच्चान्यन्न कृत कृतान्त कुरु ते तच्चापि सह्य मया ॥१६८॥

अन्वय —हे कृतान्त, अयम् बन्धनम् अपि प्राप्त. (यावत्) बहुमृतः तावत् त्वया मे हृतः, कमठः सप्राप्त., स च अपि नियतम् तव आदेशतः नष्टः, क्षुत्क्षाम. भार्यया समम् शिशुकैः त्यक्त अत्र वने भ्रमामि, यत् च अन्यत् न कृतम् (तत्) कुरु, ते तत् च अपि मया सह्यम् ।

स० टी०.—हे कृतान्त हे दैव अयम् मृग' बन्धनम् यन्त्रणम् अपि प्राप्तः आपन्न यावत बहुमृत. मृतकल्पो जातः तावत् त्वया ये मम हृत. अपहृत., यः कमठ. कच्छपः संप्राप्तः लब्ध. स च अपि नियतम् नूनम् तव आदेशतः नियोगात् नष्ट. हस्तान्निर्गत., क्षुत्क्षाम बुभुक्षाव्याकुल: भार्यया प ्या समम् सह शिशुकैः

वर्भकैः त्यक्त. नियुक्त. मन् अत्र अस्मिन् वने अरण्ये भ्रमामि भ्रमणम् (करोमि यत् च अन्यद् अपरम् न कृतम् विहितम्) तदपि कुरु ते तव तत् च अपि मया लुब्धकेन सह्यम् अवश्यमेव सोटव्यम् ।

समासः—क्षुत्क्षामः=क्षुधा क्षाम (तत्पु०)। बहुमृतः=ईषदूनो मृत (तद्धित)।

व्या०:—बहुमृत ='मृत' शब्द के पूर्व मे बहुच् (बहु) प्रत्यय । क्षाम=क्षै+क्त (त)। प्रत्यय के 'त' को 'म'। सह्यम्=सह्+यत् (य)।

शब्दार्थ:—कृतान्त=हे दैव । बहुमृत.=मृतकल्प, मरणासन्न । कमठः=कछवा । नियतम्=निश्चय ही । क्षुत्क्षाम =भूख से पीडित । सह्यम्=सहना पडेगा ।

